No. १३८९

Title अनुमान चिन्तामणि टीका
गूढार्थ तत्त्व दीपिका.

Author x

Extent ५० Age x

Subject न्याय वैशेषिक

अनुमानचिंतामणिटीका गूढार्थतत्त्वदीपिका

१२८५

न्याय

चिंतामणिटीकारघुदेवी पत्र ५०

१६००

मू० टी०
१

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः । कर्पूराम्बुजधवलं देवं लक्ष्मीस्थानकीर्तिं ब्रह्म । वेदाविदितरहस्यं सकलनमस्यं नमस्यामः १ अनुमानपरिच्छेदगूढार्थानेत्व दीपिका । धीरारणामु
पकाराय रघुदेवेन तन्यते २ असंगताभिधाने उन्मत्तप्रलपितत्वशंका स्यादिति संगतिं दर्शयन् चिन्ताव्यवधानाय प्रतिजानीते । प्रत्यक्षोपजीवकत्वादित्यादि । अत्र प्रत्यक्षोपजीवकत्वा
दित्यस्य प्रत्यक्षप्रमित्युपजीवकत्वात्प्रत्यक्षप्रमाणोपजीवकत्वाच्चेत्यर्थः प्रत्यक्षनिरूपणानन्तरमिति · प्रत्यक्षनिरूपणानन्तरमित्यस्य प्रत्यक्षप्रमितिनिरूपणानन्तरं प्रत्यक्षप्रमाणनि
रूपणानन्तरं चेत्यर्थः । प्रत्यक्षपदस्योभयत्र प्रयोगात् । अनुमानमित्यस्य तु भावल्युटः अनुमिति ४ करणल्युटः अनुमानप्रमाणं चार्थः । एवमुपमानेत्यत्रापि बोध्यं तथा च प्रत्यक्षप्रमित्यु
पजीवकत्वात्प्रत्यक्षप्रमितिनिरूपणानन्तरं बहुवादिसंमतत्वादुपमितेः प्रागनुमितिर्निरूप्यते । प्रत्यक्षप्रमाणोपजीवकत्वात्प्रत्यक्षप्रमाणनिरूपणानन्तरं बहुवादिसंमतत्वादुपमाना
त्प्रागनुमानं निरूप्यत इति समुदितग्रंथार्थः । अतो नोभयत्र संगत्यप्रदर्शनेन ग्रंथकारस्य न्यूनतापत्तिरिति अत्र प्रसंग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्यत्वं षोढा संगतिरि
ष्यते इत्यनेन परिगणितानां षड्विधसंगतीनां मध्ये नतः यन्निन उपजीवकत्वस्य न संगतित्वमिति नाशंकनीयं । हेतुतापदस्योपजीवकत्वपदार्थकार्यत्वकारणत्वं चेत्यर्थकत्वात् । अधिकं तु म

राम०
१

न दीधितावनुसंधेयं। वहुवादिसंमतत्वादित्यादिना उपमानप्रमाणान्तरमेवानुमानं कथं न निरूपितमित्याशंकानिरासः। वहुवादिसंमतमेव प्रथमं निरस्यत इत्यौत्सर्गिकत्वादिति। प्रका
रान्तरं तु दीधितावनुसंधेयं। तत्रेत्यादि। अत्र घटकत्वं सप्तम्यर्थः। कर्त्तव्यनिरूपणकानुमानत्वलक्षणान्तपदार्थः। तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वानेकर्त्तव्यनिरूपणकानुमानलक्ष
णघटिकानुमितिरिति समुदितग्रन्थार्थः। च विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया घटकीभूतव्याप्तिज्ञानं विना विशिष्टार्थज्ञानासंभवाद्विशिष्टज्ञानार्थमनुमितिः प्रथमं निरूपितेति तु
त्वं। अत्र व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति ज्ञानो न कर्मधारयः॥ व्याप्तिविशिष्टपदं व्याप्तिप्रकारकपरं। यत्पक्षधर्मत्वं यत्पक्षवृत्तित्वं। तथा च व्याप्तिप्रकारकपक्षवृत्तिताविषयकज्ञानजन्य
ज्ञानमनुमितिरित्यनुमितिलक्षणं पर्यवसन्नं। पर्वतो वह्निमानित्याद्यनुमितौ व्याप्तिप्रकारकपक्षधर्मताज्ञानानां प्रकृते वह्निव्याप्यो धूमः पर्वत इत्यादिज्ञानजन्यतया लक्षणसमन्वयः। न च विशिष्टवै
शिष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुतया वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञानजन्यवह्निव्याप्यधूमवत्पर्वतवानयं देश इत्यादिविशिष्टवैशिष्ट्यबोधात्मकशाब्दबोधप्रत्यक्षा
दावतिव्याप्तिरिति वाच्यं। व्याप्यप्रकारकपक्षविशेष्यकनिर्णयत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयात्मताभावत्वावच्छिन्नविषयताकत्वस्यानुमितित्वस्य प्रकृते विवक्षितत्वात्। उपदर्शि

मु. टी.
२

नविशिष्टवैशिष्ट्यावगाहित्वात्स्वबोधाद्व्याप्तिघटकीभूताभावविषयकत्वानुपपत्त्यभावात्। अत्र वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञानजन्येतरज्ञानलौकिकप्रत्यक्षे उपनायकज्ञानान्य
कैतज्ज्ञानजन्ये पर्वतो वह्निमानित्युपनीतभाने चातिव्याप्तिवारणाय तत्तथाविधनिर्णयजन्यत्वमपहाय तत्तथाविधनिर्णयत्वावच्छिन्नजनकतानिरूपितजन्यतायां निवेशः। तथा च तत्र नाति
व्याप्तिः। तादृशज्ञानलौकिकप्रत्यक्षप्रति तादृशज्ञानस्य विषयत्वेन तत्तथाविधोपनीतभाने प्रति तत्तथाविधज्ञानस्य वह्न्यादिज्ञानत्वेनैव च हेतुतया तत्तथाविधनिर्णयत्वेन तत्र हेतुताया अभा
वात्। न चैवं सति वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्याद्यनुमितावव्याप्तिः। तत्र व्याप्तिघटकत्वेनाभावस्य भानेनाभावविषयताकत्वस्य पर्वतोयदृष्टीतत्वस्याविरहादिति वाच्यं।
तत्तथाविधजनकतानिरूपितताभावविषयकत्वे तज्जन्यतायाश्च पक्षासत्तुभवत्वव्याप्यजातिमत्त्वस्य विवक्षिततया तत्तथाविधजन्यतायाश्च पर्वतो वह्निमानित्याद्यनुमितिन्निष्ठजिज्ञासादृशानुमिति
त्वात्मकजातिमादाय सर्वत्र लक्षणसमन्वयः। अनुभवत्वव्याप्यत्वं चात्रानुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं। अतो नानुभवत्वस्य भेदेनानुभवत्वव्याप्यतया तादृशधर्मस्य प्रसिद्धिरावति
व्याप्तिः। अत एव साधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपव्याप्तेः साध्यसाधनभेदेन भिन्नतया ऐक्याभावेनात्र विशि

एम०
२

ध्याधूमनिष्ठवह्निनिरूपितव्याप्तिरेव निवेशनीया। पर्वतत्वादिना पक्षोपि निवेशनीयः। सर्वसाधारणाय च लक्षणस्यैकस्याभावात्। तथा च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्य
धूमत्वावच्छिन्नप्रकारताकनिर्णयत्वावच्छिन्नकारणतानिरूपिताभावत्वावच्छिन्नविषयताकत्वम्ब्रूपलब्धिकार्यता। अयत्नानत्वमनुमितिलक्षणपर्यवसन्नं। एवं च पक्षसाधेनुमितावव्याप्ति
रित्यरपि दूषणाय परास्तं ज्ञातोघटितलक्षणाकरणेनोपदर्शितमिति तत्त्वात्। सर्वत्रानुमितित्वजातिमादाय लक्षणगमनसंभवादिति। न चैवं सत्यनुमितित्वमेवानुमितिलक्षणमस्तु किमितरांशनि
वेशनेनेति वाच्यं। अनुमितित्वजातिमादाय लक्षणगमनसंभवादिति। न चैवं सत्यनुमितित्वमेवानुमितिलक्षणमस्तु किमितरांशनिवेशनेनेति वाच्यं। अनुमितित्वस्य रूपेण ज्ञातेरनिवेशेन प्रकृते पथा
सन्निवेशेनैव व्यर्थ्याभावादिति। न चैवं सत्यपि भ्रमायाः एककस्या ध्याप्यापक पर्वतो वह्निमान्स्यादित्यापन्नावतिव्याप्तिः। आपन्नौ आपाद्यव्याप्यापादकवत्ताज्ञानस्य हेतुनया ज्ञाताद् शाप्यत्वेर्वह्निव्याप्य
धूमवान्पर्वत इतिज्ञानजन्यत्वेन निरूक्तलक्षणस्य तत्र सत्वादिति वाच्यं। आपन्नेर्मानसत्वेन विशेषणतया तत्र व्याप्यादिज्ञानरूपहानलक्षणसन्निकर्षवलाद्धूमादिमानसंभवेनाभावत्वावच्छि
न्नविषयताकत्वरूपस्वघटितलक्षणस्य तत्रासत्वेनातिव्याप्तिविरहात्। इत्यसं बहुना रजत्वपनेनानत्करणामिति। निरूक्तानुमितिकरणमित्यर्थः। अनुमानमिति। अनुमानपदवाच्यमित्य

मु॰ टी॰
३
3

र्थः। लिंगपरामर्शो लिंगविशेष्यकव्याप्तिज्ञानं। यथाश्रुते व्याप्यप्रकारकपक्षविशेष्यकज्ञानात् अतो न लक्षणलक्ष्यतावच्छेदकाभेदः। अनुमानलक्षणमुक्त्वा अनुमानस्वरूपमाह। तच्चेति।
वस्त्वर्थे। तथा चानुमानस्वरूपं लिंगमर्थः। लिंगपरामर्शो लिंगविशेष्यकव्याप्तिज्ञानं। यथाश्रुते व्याप्यप्रकारकपक्षविशेष्यकज्ञानात्मकस्य परामर्शस्य व्यापारतया व्यापारवत्कारणत्वरूपकर
णत्वाभावेनानुमितिकरणत्वाभावादनुमानस्वरूपत्वानुपपत्तेः। वक्ष्यत इति। परामर्शग्रन्थ इति शेषः। न चाननिरुक्तानुमानलक्षणस्य व्याप्तिज्ञानमेव लक्ष्यमिति भावः। एतेन तृतीयमानलिं
गकरणतावादिमते नित्यलिंगस्याप्यनुमानतया अनुमानत्वावच्छेदेन प्रत्यक्षोपजीवकतया अभावेन न तस्य अनंतेयाभिधाननियामकत्वासंभवात्कथं प्रत्यक्षोपजीवकत्वादिसादित्यं येन त
थोक्तिरित्याशंका निरस्तेति। अनुमानस्य लक्षणे स्वरूपमुक्त्वा प्रसंगात्प्रमाणपञ्चकस्यापि चतुष्टयं चार्वाकमतमुत्थापयति। अथेत्यादि। अनुमानं। धूमादिविशेष्यकव्याप्तिज्ञानं। एतेना
नुमितिकरणत्वरूपानुमानलक्षणलक्ष्यतावच्छेदकत्वे परमते आश्रयासिद्धिरिति परास्तं। धूमादिज्ञानत्वस्य प्रत्यक्षलक्ष्यतावच्छेदकत्वात्। न प्रमाणं। प्रमितिकरणाभिन्नं। अत्र प्रमाणतावच्छेदकरू
पम्रूपत्वादित्यत्र हेतुः पूरणीयः। नन्वत्र हेतुरसिद्धः। प्रमाणतावच्छेदकव्याप्तिप्रकारकधूमादिविशेष्यकनिश्चयत्वस्य धूमादिविशेष्यकव्याप्तिज्ञाने सत्त्वादित्यत आह। योग्याधीनामित्यादि। योग्या राम॰
३

नुपलब्ध्यापद्यर्थे हेतुः योग्योपाधिमान्स्यात्तदा योग्योपाधिमत्तयाऽउपलभ्येत सापत्तिविषयीभूतयोग्योपाध्युपलंभाभावेन रप्रतियोगीसत्वप्रसंजनप्रसंजितोपलंभप्रतियोगीकाभावस्य यो
ग्यानुपलब्धिपदार्थत्वात्तत्र न योग्यानि इति ध्येयं। व्यभिचारसंशयहेतुत्वादिभावः। न च व्याप्तिनिर्णयप्रतिबंधकीभूतव्यभिचारसंशयस्य सर्वत्र सत्वेन व्याप्तिनिर्णयस्यासंभावितत्वाद्व्या
प्तिनिर्णयत्वस्याभावनोयर इति निरासात्स्वरूपासिद्ध्यसंभव इति भावः। ननु उपाधिसंशयो व्यभिचारसंशयापोन संभवति। न तत्प्रतिबंधकीभूतसाध्यसाधनसहचारज्ञानस्य सत्वादित्यत आह। ज्ञातव्याः
सहचरितयोरित्यादि। ज्ञातव्याः सहचरितयोः। पार्थिवत्वलोहलेख्यत्वयोः। हीरके व्यभिचारज्ञानस्य सत्वादित्यर्थः। तथा च व्यभिचारज्ञानानुपपत्त्या निरुक्तसहचारज्ञानस्य व्यभिचारज्ञानप्रति
बंधकत्वं न संभवतीति भावः। ननु अनुमानप्रमाणानंगीकारे धूमादिज्ञानानंतरं वह्निज्ञानासंभवेन तदुत्तरं पर्वतो वह्निमानिति शाब्दप्रयोगरूपव्यवहारानुपपत्तिः। व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य
हेतुत्वादित्यत आह। लोके इत्यादि। लोके इत्यस्य व्यवहार इत्यत्रान्वयः। चरत्वर्थौत यावद्धूमज्ञानानंतरं लोके वह्निव्यवहारस्तत्रेत्यर्थः। संभावनामात्रादिति। धर्मधर्मिसंसर्गाग्रहविशिष्टपर्वतज्ञान
कालीनवह्निज्ञानादित्यर्थः। प्रकृते च संशयस्मरणात्मकतादृशज्ञानस्यैव संभावनापदार्थत्वादिति। मात्रपदेनात्रज्ञानात्मकस्य व्यवच्छेदः। ननु चार्वाकमते वन्ध्यादिदृष्टविधः। पारमार्थिकोऽपारमार्थिक

मु॰ टी॰
४

अत्र पारमार्थिकवह्निर्निर्विकल्पकविज्ञानविषयः। अपारमार्थिकवह्निः सविकल्पकविज्ञानविषयः। तस्य पारमार्थिकवह्निविषयकत्वे तत्र वह्नित्वभानानुपपत्तिः। तन्मते वह्नित्वादेरेव वह्नि-
भेदादिरूपतया तद्व्यावृत्तस्वात्मकस्याभावतया तन्मते सिद्धत्वालीकात्मकस्य पारमार्थिकवह्न्यादेः संबन्धाभावात्। सदसतोः संबन्धानंगीकारात्। एवं चोपदर्शितस्मरणादुत्पादितव्यवहारांगीकारेणाद्-
शब्दव्यवहारजनकत्वेन सर्वसिद्धस्य प्रामाण्यानुभवस्यानुपपत्तिः। स्मरणात्मकत्वाभावादेः सप्रकारकतया अलीकविषयके प्रामाण्याभावात्। तन्मते अलीकविषयकज्ञानस्य भ्रमत्वनियमादि-
त्यादेः नच प्रामाण्याभिमानादिति नाप्यस्य स्वयं प्रमाणमिति। तत्राह। संवादेनेत्यादि। संवादेन। निर्विकल्पकमूलकसविकल्पविषयकत्वरूपसंवादात्मकदोषेण प्रामाण्याभिमानात् यावद्विषयव्य-
वहारजनकवह्निस्मरणाया प्रामाण्यभ्रमात्। तथा च तत्र भ्रमात्मकत्वेनैव तादृशानुभवस्य निर्वाह इति भावः। उपसंहरति। इतीत्यादि। अनया दिशा। अनुमानस्याप्रामाण्येन तद्धानवाजिग्रहम-
योऽस्योपमितिशाब्दजनकयोरुपमानशाब्दयोः। सुतरामप्रामाण्यमस्य स्यातिरिक्तं न प्रमाणमित्यर्थः। न च क्रोपक्रमोपसंहारविरोधः। अनुमानत्वावच्छिन्नेऽप्रामाण्यसाधनस्योपक्रान्ततया ते-
दुभयावच्छिन्नत्वेनैव तस्योपसंहरणीयत्वौचित्यात्। उपक्रमोपसंहारयोः समानप्रकारकत्वनियमादिति चेन्न। यतो नाप्यस्य स्वयं प्रमाणमिति अनुमानेन प्रमाणमिति तस्योपसंहारः। अपि राम॰
४

त्विदमपि प्रतिज्ञातमिति ॥ ॥ अथ यथावानात्मप्रत्यक्षं प्रमाणमित्युपसंहारानुरोधेन अनुमानं न प्रमाणमित्युपक्रमोपि नात्मप्रत्यक्षं प्रमाणमित्येतत्परतया व्याख्येयः। अनुमानशब्दस्य अनु
मप्रत्यक्षानुपलमानप्रमाणमिति व्युत्पत्त्या विधार्थसंभवादिति। ननु अनुमानस्याप्रामाण्यं प्रमाणान्तरावच्छेदकरूपध्रुवत्वहेतुना साध्यते उतानुमानं न प्रमाणमिति शब्देन शास्त्राविरोधे आ
हा। अप्रमाणसाधर्म्यरोत्यादि। अप्रमाणसाधर्म्यरा। अप्रमाणत्वेति प्रमाणान्तरावच्छेदकरूपध्रुवत्वेनेति यावत्। यथाश्रुतेच हेतुरादेर्व्यभिचारात्। एष साधर्म्यस्य ज्ञापमानो प्रमाणसाध
र्म्यस्य ज्ञायमानप्रमाणान्तरावच्छेदकरूपध्रुवत्वस्येति यावत्। अनुमानत्वात्। अनुमानप्रमाणत्वात्। एवं तु ज्ञायमाने हेतोरनुमानत्वं मंगीकुर्वता माचायपरिणामतमवलंब्योक्तं। चिंतामणिकारमते
तु तथाविधहेतुज्ञानमेवानुमानप्रमाणमित्यवधेयं। अंसे आह। एतद्वाक्यस्येति। एतद्वाक्यस्य। अनुमानं न प्रमाणमिति वाक्यस्य। संदिग्धविपर्यस्तान्यतरं यत्। अनुमानं प्रमाणं न वेति संदेहविशि
ष्टपुरुषं प्रति अनुमानं न प्रमाणमिति अप्रामाण्यविषयिणी प्रमाणत्वप्रकारकज्ञानविशिष्टं प्रति चेत्यर्थः। अर्थवत्त्वात्। तादृशपुरुषयोस्तथाविधसंदेहनाशतथाविधविपर्ययनाशयोः प्रयोज
कत्वेन तदुभयप्रयोजनवत्वात्। तयोस्तथाविधसंदेहतथाविधविपर्ययज्ञानयोः। अप्रत्यक्षत्वात्। एतादृशप्राद्यप्रयोगकर्तुरप्रत्यक्षत्वात्। अयं भावः। अनुमानस्याप्रामाण्येन यादृशप्रत्ये

मु॰टी॰
५
5

मप्रिरेवन संभवति। न च हि। परकीयस्य तथाविधसंदेहविपर्ययताक्षस्यहेतुत्वात्। तथा चेष्टज्ञानासंभवेन तत्साधनताज्ञानस्य तादृशाशयप्रयोगकर्तुः प्रत्यक्षासंभवेनाज्ञाततया तज्ज्ञानमा
शयपक्षे तज्ज्ञानासंभवः। अभावबुद्धिं प्रति प्रतियोगिज्ञानस्य हेतुत्वात्। तथा चेष्टज्ञानासंभवेन तत्साधनताज्ञानस्याप्यसंभवात्। तादृशाशयानुकूलकंठताल्वाद्यभिघातस्याप्यभावइति तादृशाश
यानुकूलकंठताल्वाद्यभिधानाभावात् जनकाभावेन तादृशशब्दराव न संभवतीत्युक्तस्सत्साहेतुमानेऽप्रामाण्यं साधनीयमिति। ननु तथाविधेष्टप्रतियोगी परकीयसंशयादेः ज्ञानेनिरुक्तसंभा
वनात्मकमेव तत्र भविष्यतीति नोक्तानुपपत्तिरित्यतो दोषांतरमाह। एतद्वाक्यस्येत्यादि। अनुमानेनप्रमाणमिति वाक्यस्याप्रामाण्ये अप्रामाण्ये च प्रत्यक्षातिरिक्तस्याप्रामाण्यव्याघातादि
त्यर्थः। एतद्वाक्यस्याप्रामाण्ये साध्याद्येव प्रत्यक्षातिरिक्तस्येतद्वाक्यस्याप्रामाण्यमागतं। अप्रामाण्येव भ्रमजनकत्वलक्षणाप्रामाण्यघटकीभूतभ्रमस्य स्वविषयबाधाधीनतया अनुमाने
अप्रामाण्याभावस्वरूपतथाविधविषयबाधस्यावश्यापेक्ष्यतया प्रत्यक्षातिरिक्तस्यानुमानस्याप्रामाण्ये दुष्परिहरमिति भावः। ननु अनुमानं न प्रमाणमिति वाक्यस्याप्रामाण्ये उपदर्शिते री
त्या अनुमानस्याप्रामाण्यमावश्यकमित्युक्तमशुद्धं। यतो भ्रमजनकत्वमप्रामाण्यं न वदामः। अपि तु प्रमाकरणान्वयव्यतिरेकमेवेति नानुपपत्तिरतो दूषणांतरमाह। अपि चेति। प्रमासम। राम॰

५

प्रत्यक्षात्मकज्ञानस्याप्रामाण्यापत्तेः। प्रामाण्यासिद्धिप्रसंगात्। न स्यादनुमेयत्वात्। तत्प्रामाण्यस्यानुमानप्रमाणगम्यत्वात्। तथा चानुमानाप्रामाण्ये प्रत्यक्षस्याप्रामाण्यासिद्धौ प्रत्यक्षमपि
प्रमाणं न स्यादिति भावः। ननु प्रत्यक्षात्मकज्ञानप्रामाण्यं स्वेनैव गृह्यत इति अनुमानाप्रामाण्ये न प्रत्यक्षस्याप्रामाण्यासिद्धिप्रसंगः। तस्य प्रामाण्ये प्रत्यक्षस्यैव प्रमाणत्वादत आह। स्वतः प्रामाण्यग्र
ह इति। प्रत्यक्षज्ञप्तिप्रामाण्यस्य स्वेनैव ग्रह इत्यर्थः। तत्संशयानुपपत्तेरिति। अयं घट इत्यादिव्यवसायतृतीयक्षणे जायमानस्य इदं ज्ञानं प्रमा न वेति संशयस्यापत्त्यापत्तेरित्यर्थः। निश्चि
ते संशयायोगादिति भावः। वस्तुतस्तु वह्निव्याप्यधूमवत्पर्वत इति ज्ञानानन्तरं यत्र वह्निज्ञाने तदुत्तरमाविर्वह्निमनुमिनोमीत्यनुभवसिद्धस्यानुमितित्वरूपजातिविशेषस्याव्यापकत्वापातादवच्छिन्नं
प्रतिव्याप्तिज्ञानस्य करणत्वमवश्यं वाच्यं। अन्यथा ज्ञानमात्रस्यासाधारणकारणत्वस्यानुपपत्तेः। तथा च व्याप्तिज्ञानस्यानुमानप्रमाणत्वमावश्यकमिति। अधिकमनुमितिमानसविचारे अनु
संधेयं। ननु व्याप्तिनिरूपणे सत्यनुमानप्रामाण्यं तच्च न संभवति सर्वत्रोपाधिशङ्कया व्यभिचारसंशयेन तन्निश्चयासंभवादत आह। व्याप्तिग्रहोपायप्रतिवचने। व्याप्तिं निरूपयितुमिच्छति। नन्विति। अनुमि
तिलक्षणादिति शेषः। अनुमितिहेत्विति। अनुमितिहेतुत्वेन निविष्टमित्यर्थः। तथा चानुमितित्वलक्षणतोऽनुमितिहेतुत्वेन निविष्टं यद्व्याप्तिज्ञानं तद्विषयीभूता व्याप्तिः कीदृशीत्यर्थः। एतेन प्रत्यु

मु॰टी॰
६
6

नघटकत्वरूपोयोह्युनसंगत्यानुमितिलक्षणानंतरंव्याप्तिर्निरूप्यतइतिसंचितेनन्वीति।हियस्मात्।ननु।अव्यभिचरितत्वंनेतिसर्वस्मिन्लक्षणेसंबध्यतेतोनयावयतोऽव्यभिचरितत्वंनसाध्या
भाववदवृत्तित्वमित्यादिस्वरूपंकेवलान्वयिन्यभावात्अतोऽव्यभिचरितत्वंनव्याप्तिरितिसमुदितनयेयार्थः।अतोनात्रनकारद्वयानन्वयापत्तिः।साध्याभाववदवृत्तित्वमित्यत्राव्ययीभावगर्भो
वहुव्रीहिः।नचाहिवृत्तेरभावोऽप्रसिद्धः।साध्याभाववद्वृत्तिर्यस्यसाध्याभाववदवृत्तिस्तस्यभावःसाध्याभाववदवृत्तित्वं।वह्निमान्धूमादित्यादौसाध्याभाववन्तिजलहृदादेस्तोरवृत्तितयालक्ष
णासमन्वयः।धूमवान्वह्नेरित्यादौसाध्याभाववदयोगोलकेवह्नेर्वृत्तितयानातिव्याप्तिः।नचधूमाभाववत्यपियोगोलकेवह्नेर्वृत्तित्वेपिधूमाभाववतिजलहृदादेस्त्वाद्वृत्तितयाऽतिव्याप्तिर्दुरुद्धरैवेति
वाच्यंसाध्याभाववदवृत्तित्वमित्यत्रसाध्याभाववद्वृत्तित्वत्वावच्छिन्नसामान्याभावस्यविवक्षितत्वात्।वृत्तित्वंहेतुतावच्छेदकसंबंधेनग्राह्यं।अतोवह्निमान्धूमादित्यादौवह्न्यभाववतिजलहृदेकालिकसंबंधे
नधूमस्यवृत्तावपिनक्षतिः।साध्याभावःसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोग्राह्यः।अतोनवह्निमान्धूमादित्यादौसमवायादिसंबंधावच्छिन्नप्रतियोगिताकव
ह्न्यभाववतिपर्वतादौभावमहानसीयवह्न्यभावादिकमादायदोषः।साध्याभाववत्त्वंदैशिकविशेषणतात्मकविशेषसंबंधेनबोध्यं।अन्यथाकालिकसंबंधेनवह्न्याद्यभाववतिपर्वतादौधूमादे राम॰

वृत्तित्वेपिनक्षतिः। नचैवंसतिघटत्वाभाववान्पटत्वादित्यादावव्याप्तिः अत्रघटत्वाभावाभावस्यघटत्वस्याभावीयदैशिकविशेषणताविशेषसंबंधेनाधिकरणतायाअप्रसिद्धेरितिवा
च्यं। अभावाभावस्यातिरिक्तत्वानंगीकारात्। साध्याभाववत्तायाः साध्यवत्ताग्रहविरोधितानियामकसंबंधेनविवक्षणात्। अतएवकालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभा
ववान्नात्मत्वादित्यादावव्याप्तिः। अन्यथातथाविधसाध्याभावस्याकाशाभावस्याधिकरणेआत्मनिआत्मत्वस्यवृत्तित्वेनाव्याप्तेः। नचैवंसत्यपिसत्तावान्जातेरित्यादावव्याप्तिः साध्या
भाववतीनसामान्यादौहेतुतावच्छेदकसंबंधेनहेतोरप्रसिद्धेरितिवाच्यं। स्वाधिकरणवृत्तिसाध्याभाववत्त्वमितिविवक्षणात्। स्वपदंसमवायहेतुपरं। अतएवनवह्निमान्गगनादित्यादावनि
व्याप्तिरपीतिध्येयं। नचैवमपिकपिसंयोगीएतद्वृक्षत्वादित्यादावव्याप्तिः कपिसंयोगाभावस्याव्याप्यवृत्तितयाएतद्वृक्षत्वाधिकरणेसत्वादित्यतोधिकरणपदेनाव्याप्यवृत्तिप्रतियोगिकाभा
वभेदेवादिपदेनलक्षणमाह। साध्यवदन्येति। अत्रसाध्यवद्भिन्नेसाध्याभाववदितिसमभिमानसुरूपाश्रयणात्साध्यवद्भिन्नवृत्तिसाध्याभाववद्वृत्तित्वमितिलक्षणवाक्यार्थः। वह्निमान्
धूमादित्यादौवह्निमद्भिन्नेवर्तनेयोवह्न्यभाववान्ह्रदस्तद्वृत्तिजलह्रदादौधूमस्यावृत्तेर्लक्षणसमन्वयः। कपिसंयोगीएतद्वृक्षत्वादित्यादौकपिसंयोगवद्भिन्नेगुणादौवर्तनेयः कपिसंयो

मु॰टी॰
७

गाभाववत्त्वानुगुणादिरेव एतल्लक्षणकर्तृमते ऽधिकरणभेदेनाव्याप्यवृत्तिप्रतियोगिकाभावभेदानभ्युपगमाच्चैतत्कृत्स्नत्वादेस्तद्वृत्तित्वाल्लक्षणसमन्वयः। अत्र साध्याभावानुयोगानेव
ह्निमान्धूमादित्यादौ वह्निमद्भिन्नवृत्तित्वस्याव्याप्यधिकरणे पर्वते दोषः पक्षवृत्तितयाऽदोषः। अत एव तदुपादानं। अत एव साध्याभावे पत्रेन साध्यपदस्वार्थ्यो। वह्निमद्भिन्नजलह्रदवृत्ति घटत्वा
द्यभावाधिकरणे पर्वते दोषमोऽह्निति तथा वह्निमान्धूमादित्यादावसंभवस्तदुष्परिहरत्वात्। न चाधिकरणभेदेनाभावभेदमतेऽनन्तधर्मस्य साकल्यानन्वयानुपपत्तिरिति वाच्यं। व्याप्यवृत्तित्वा
व्याप्यवृत्तित्वरूपविशेषधर्मावच्छिन्नाव्याप्यवृत्तिप्रतियोगिकाभावस्यैवाधिकरणभेदेन भेदाभ्युपगमात्। अन्यथा तस्यैव पूर्ववदिति। ननु ययं घटाकाशसंयोगघटत्वान्यतराभाववान् गगनत्वादित्या
दावव्याप्तिः। तथाविधसाध्यवद्भिन्ने घटे वर्तते यः साध्याभावो घटाकाशसंयोगः तद्वृत्ति आकाशे गगनत्वस्य वृत्तेः। न चाप्रसिद्धिरिति वाच्यं घटानधिकरणदेशावच्छेदेन गगने घटाकाशसंयो
गाभावस्य घटत्वान्यतराभाववति विद्यमानतया व्याप्यवृत्तिप्रतियोगिकत्वेनाधि(विद्यमानतया तथाविधान्यतराभावसत्त्वादिति चेन्न। अभावाभावस्यातिरिक्तत्वे नैतद्दोषाभावात्। तथा हि तथा
विधान्यतराभावाभावस्य तथाविधान्यतराभाववति विद्यमानतया व्याप्यवृत्तिप्रतियोगिकत्वेनाधिकरणभेदेन भेदाभावात् तथा च तथाविधसाध्यवद्भिन्ने घटे वर्तते यस्तादृशान्यतराभावाभावस्त रामः
७

स्य गगनेऽसत्त्वेन तत्र तादृशाव्याप्तिरिति। लाघवाल्लक्षणान्तरमाह। साध्यवदिति। यत्तु अधिकरणभेदेनाभावभेदे मानाभावात्कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः कपिसंयोगवद्भिन्ने गुणादौ व
र्त्तिनि यः कपिसंयोगाभावस्तस्यैतद्वृक्षेऽपि विद्यमानत्वादित्यतो लक्षणान्तरमाह साध्यवदित्यादि। तत्र सत्। एतल्लक्षणेऽपि तत्राव्याप्तिसत्त्वात्तादृशावतारणिकाया असंगतिरिति। नन्वेतल्लक्ष
णेनानाधिकरणकसाध्यकसद्धेतावव्याप्तिः वह्निमान्धूमादित्यादावव्याप्तिः वह्न्यादिमत्सवृत्तिप्रतियोगिकभेदस्य तत्र महानसादौ धूमादेर्विद्यमानत्वादतो लक्षणान्तरमाह। सकलेत्यादि। वह्निमान्धू
मादित्यादौ सकलसाध्याभाववद्वृत्तिजलह्रदादौ वर्त्तते यो धूमाभावस्तत्प्रतियोगित्वस्य धूमे सत्त्वाल्लक्षणसमन्वयः। न चात्र धूमवान्वह्नेरित्यादावतिव्याप्तिः सकलधूमाभाववद्वृत्तिजलह्रदे वर्त्तते या
वह्न्यभावस्तत्प्रतियोगित्वस्य वह्नौ सत्त्वादिति वाच्यं। साकल्यस्य साध्याभाववत्त्वापि विशेषणीयत्वात्। तथा च तत्र नातिव्याप्तिः। सकलसाध्याभाववत्सकलान्तःपातिनि अयोगोलके वह्न्यभावस्याप्र
तीतयात्तत्र लक्षणागमनासंभवात्। न चैवं सत्यपि वह्निमान्धूमादित्यादावव्याप्तिः सकलसाध्यप्रतियोगिकघटत्वकुसुमयाभाववत्सकलान्तःपातिनि पर्वतादौ धूमाभावासत्त्वादिति वाच्यं। सकल
साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्य विवक्षणात्। न चैवं सत्यपि कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरिति वाच्यं। साध्याभावप्रतियोगिवैयधिकरण्यविशेषणा

मु. टी.
८
८

त् प्रतियोगिवैयधिकरण्यमत्र प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं न चासिद्धान्तलक्षणोक्तरीत्या प्रतियोगिवैयधिकरण्यविकल्पापत्तिः। यादृशप्रतियोगितावच्छेदकावच्छिन्नानधि
करणवृत्तिसाध्यनिष्ठतादृशप्रतियोगिताभावस्य साध्याभावांतेन विवक्षणात्। अत्र प्रतियोगितावच्छेदकावच्छिन्नविशेषणतया गुणकर्मान्यत्वविशिष्टसत्ताया भ्रान्तेरित्याहाव त्यव्याप्तिः (ज्ञावच्छेद
(कावच्छिन्नानधिकरणवृत्तित्वं अतो न सिद्धान्तलक्षणरीत्या प्रतियोगिवै। अत्र निरुक्तप्रतियोगिवैयधिकरण्यवैशिष्ट्यं साध्याभावे निवेशनीयं। अन्यथा गुणादिकमंतर्भाव्य निरुक्तप्रतियोगिवैयधि
करण्यासंयोगाभावस्य तद्देशसत्वेन कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्त्यापत्तेः। न चैवं सत्यपि घटः कपिसंयोगादित्यादावतिव्याप्तिः। घटत्वाभाववति तत्र द्रव्ये कपिसंयोगाभावस्य विद्यमान
त्वादिति वाच्यं हेत्वभावेपि प्रतियोगिवैयधिकरण्यनिवेशात्। अत्र प्रतियोगिवैयधिकरण्यं हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं अतो न द्रव्यं गुणकर्मान्यत्वे सति सत्तादित्यादावव्याप्तिः
न वा सिद्धान्तलक्षणरीत्या प्रतियोगिवैयधिकरण्यविकल्पापत्तिः। हेत्वधिकरणत्वमत्र हेतुतावच्छेदकसंबंधेन बोध्यं। अतो वह्निमान् धूमादित्यादौ समवायसाध्याभाववति जलह्रदादौ संबंधसामान्येन यत्
धूमानधिकरणां न द्वृत्तित्वविशिष्टधूमाभावस्यासत्वेपि न क्षतिः। एतेन द्रव्यं सत्तादित्यादौ द्रव्यत्वाभाववद्वृत्ति गुणकर्मान्यत्वविशिष्टसत्ताभावप्रतियोगित्वस्य सत्तायां सत्वेनातिव्याप्तिरिति हेतुताव राम०
८

छेदकावच्छिन्नत्वं प्रतियोगितायां निवेशनीयमिति यदुक्तं तत्र विशिष्टसत्ताभावस्य सत्तात्वरूपहेतुतावच्छेदकावच्छिन्नानधिकरणाहतित्वरूपनिरुक्तप्रतियोगिव्यधिकरणविशिष्टस्य दुष्टत्वा
भाववत्त्वकत्वात् यत्किंचिन्निर्गुणादावसत्वेन लक्षणाघटकतया तदभावाप्रसिद्ध्यासंभवादिति। इतोपि लघुलक्षणान्तरमाह साध्यवदिति। यत्तु अत्र निर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादावव्या
प्तिः तथाविधसाध्याभाववत्तिधर्मरीत्या धूमाभावरूपहेत्वभावस्याप्रसिद्धेरसत्वात् अतः साध्यवद्भेदसत्तारीत्याकांक्षयच्छति। तदसत्। तत्र वह्न्यभावरूपहेतोरभावाभावमादायैव लक्षणा
गमनसंभवात्। सकलसाध्याभाववद्वृत्त्यभावे सत्त्वासंसर्गान्योन्याभावसाधारणाभावत्वस्यैवोभावनिवेशनादिति। अत्र साध्यवदन्योन्यभेदेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदस्य विवक्षितत्वादन्यथा अन्यादि
पदसमभिव्याहारस्थलेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकान्योन्याभाववत्ताबोधनियमात्तथैवान्यादिपदसमभिव्याहारस्थानस्य तत्र हेतुलक्षणत्वात् अन्यथान्वयिप्रतियोगिकान्योन्याभा
ववन्मात्रबोधने नीलो घटो घटादन्य इति प्रतीत्यापत्तेः। एवं च साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववद्वृत्तित्वं व्याप्तिरिति निष्कृष्टलक्षणार्थः। अतो न वह्निमान् धूमादित्यादौ महानसीयवह्नि
मन्महानसभेदमादायाव्याप्तिः। तच्चैवं सत्यपि तत्राव्याप्तिः महानसीयवह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदस्यापि साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदतया लक्षणघटकत्वादिति वाच्यं सा

मु.टी.
९
१

ध्यतावच्छेदकावच्छिन्नत्वस्वावच्छिन्नप्रतियोगिताकाभावान्याभावस्यैव प्रवेशे निवेशादिति। लक्षणायं चकमेव हेत्वयनिकेवलान्वयिन्यभावादिति। इदं चाखंडे यत्वादिसाध्येनाव्यत्वस्य साध्यामा
वाद्यमसिध्याऽव्याप्तेरित्यर्थः॥ ॥प्रकारांतरेणाव्याप्तिं लक्षणमाशंकते हेत्वयनि नाधीत्वादि साध्यसामानाधिकरण्यानधिकरणत्वमत्र न साध्याधिकरणावृत्तित्वानधिकरणत्वं द्रव्यं सत्वादि
त्यादावतिव्याप्तेः। अपितु साध्यसामानाधिकरण्यपदस्याधेयत्वानिरूपकाधिकरणावृत्तित्वेनाक्षणिकतया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणावृत्तित्वाभाववत्त्वमेव तत्। द्वितीयाधिकरणत्वस्य
वैयर्थ्येनानुपादानात्। यद्वृत्तित्वं अत्र हेतुतावच्छेदकसंबंधेनावश्यं निवेशनीयं अन्यथा कालिकादिसंबंधमादाय वह्निमान् धूमादित्यादौ दोषापत्तेः। तथा च समवायेन द्रव्यत्वादिसाध्या
प्तिः सत्ताभाववति सामान्यादौ समवायेन वृत्तेरप्रसिद्धेरिति विभाव्यते न तादात्म्यसंबंधावच्छिन्नतथाविधवृत्तित्वाभावविशिष्टाया हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छे
दकहेतुतावच्छेदकवत्त्वमेव तत्त्वं बोध्यं। लक्षणांतरमाह साध्यवैयधिकरण्येत्यादि॥ अत्र साध्यानधिकरणावृत्तित्वमर्थः द्वितीयाधिकरणत्वस्य वैयर्थ्येनानिवेशात्। न च साध्यवदन्यावृत्तित्व
मित्यनेन पौनरुक्त्यापत्तिरिति वाच्यं। अत्र तथाविधवृत्तिमिश्रत्वस्यैव निवेशो न वृत्तित्वसत्तामात्रघटितपूर्वोक्तलक्षणेन पुनरुक्तेरभावादिति। एतल्लक्षणद्वयमेकोनाऽन्यघट इत्ययनितदुभय साम०
९

मपीति। साध्यानधिकरणानधिकरणत्वमित्यस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणानिरूपितवृत्तित्वाभावविशिष्टहेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकहेतुता
वच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकहेतुतावच्छेदकवत्त्वं साध्यानधिकरणवृत्तिभिन्नत्वं चार्थः। यद्यप्येतेनैव तात्पर्यकल्पनादिति तत्त्वेति। नादृशलक्षणद्वयं चेत्यर्थः। प्रथमलक्ष
क्षणे तथाविधआधेयत्वानिरूपके यत्र तथाविधाधेयतानिरूपकतावच्छिन्नप्रतियोगिकभेदो विवक्षितः। तथाविधाधेयतानिरूपकप्रतियोगिकभेदो वा। एवं द्वितीयलक्षणे साध्यानधिकरण
त्वत्र साध्यवत्त्वावच्छिन्नप्रतियोगिकभेदो विवक्षितः साध्यवत्प्रतियोगिताकभेदाप्रसिद्ध्या साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्या चेति दोषः। द्वितीयलक्षणद्वये रक्षामाह यत्किंचिदित्यादि
पत् किंचित्साध्यनिष्ठाधेयत्वानिरूपकाधिकरणीयत्किंचित्साध्यानधिकरणे घटपर्वतादौ वर्त्तमाने धूमे प्रसिद्धमित्यर्थः। अप्रसिद्धमित्यस्य पूर्वोक्तकेवलान्वयिसाध्यकहेतावित्यत्रान्वयो बोध्य
इति। साध्याभाववद्वृत्तित्वमिति व्याप्तिलक्षणे केवलान्वयिसाध्यकहेतावव्याप्तिमुद्धर्तुमाशंकते अपि तत्समवायितयेति। एवकारोप्यर्थः तथा च समवायितया व्यत्ताभावो घटेपि प्रसिद्ध इत्य
र्थः। समवायित्वेन वाच्यत्वेनावृत्तीति प्रतीतिसिद्धं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवाच्यत्वाभावं केवलान्वयिनमादाय तत्र लक्षणसमन्वयः। वाच्यत्वं तत्स्वाच्छत्वादपर्यायो बोद्धव्य इति भ

मु.टी.
१०
10

रेच्छाविषयत्वमतिरिक्तशक्तिविशेषो वा। अतो नानुपपत्तिरिति ध्येयं। अथ साध्याभाववद्वृत्तित्वमित्यत्र साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावोऽवश्यं निवेशनीयः अन्यथाव
ह्निमान्धूमादित्यादौ महानसीयवह्न्याद्यभावमादायाव्याप्तेः। तथाचेदं वाच्यं ज्ञेयत्वादित्यादौ कथं समवायित्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावमादाय लक्षणासमन्वयः। तादृशा
भावस्य वाच्यत्वत्वरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वाभावेन लक्षणाघटकत्वादिति चेत्। अत्र वदन्ति। साध्याभाववद्वृत्तित्वमित्यादिलक्षणे साध्यप्रतियोगिकाभावत्वावच्छि
विषयत्वमिति मेरणां शंकते अथेत्यादीत्याहुः। वस्तुतस्तु। तत्र महानसीयवह्न्यभावादिकमादायाव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावो न निवेश्यते केवलान्वयिन्यव्या
प्तिप्रसंगात्। अपि तु साध्यतावच्छेदकावच्छिन्नाधिकरणावृत्तित्वव्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकत्वोभयाभावविशिष्टोऽभाव एव निवेश्यते तथा च तत्र नाव्याप्तिः। उपदर्शिताभावमादा
य लक्षणगमनसंभवादित्यभिप्रायेणाशंकते अथेत्यादीत्येवं वर्णनीयं। ननु तथापि तत्र केवलान्वयिसाध्यकेऽव्याप्तिर्दुष्परिहरैव न तत्र तथाविधव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावव
त्ति घटादौ हेतोर्वृत्तेरिति चेन्न यावन्तः साध्यतावच्छेदकावच्छिन्नाधिकरणावृत्तित्वव्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकत्वोभयाभावविशिष्टाभावाः प्रत्येकं तत्तत्सजातीयापेत तत्साध्याभा राम.
१०

वद्वृत्तित्वाभावात्तद्भूतस्यैव प्रकृते व्याप्तिलक्षणत्वेन विवक्षितत्वात्। सामानासंबंधात्र समानासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वामन्तरेणैव बोध्यं। तथा च तत्र नाव्याप्तिः। किं त
द्रव्यधिकरणधर्मावच्छिन्नसाध्याभावसुज्ञानो यद्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावमादायैव तत्र लक्षणगमनसंभवादिति। नैवमित्यादि। एवं तत्राधिकरणधर्मावच्छिन्नप्रतियोगि
ताकसाध्याभावमादाय साध्याभावप्रसिद्ध्यंगीकारे। घटत्ववान् घटमंतर्भाव्याप्यव्यभिचारः साध्याभाववद्वृत्तित्वरूपव्यभिचारसत्त्वात्। तथा च केवलान्वयिसाध्यकहेतावव्यभिचारित्वेनालक्षणतया
मत्र लक्षणागमनार्थमुपदर्शितप्रकारांतरेणैव नेति निरर्थकमेवेति भावः। नैवमित्याशंकां निराकरोति। साध्यतावच्छेदकावच्छिन्नेत्यादि। तादृशाः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव
इति साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वस्याप्यव्यभिचारपदार्थत्वेऽपीत्यर्थः। तादृशसाध्याभावेति। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावेत्यर्थः। अव्यभिचरि
तत्वस्यैव व्याप्तिपदार्थत्वादिति भावः। अप्रसिद्धेरिति। केवलान्वयिसाध्यके तादृशसाध्याभावाप्रसिद्ध्या तादृशलक्षणाप्रसिद्धेरित्यर्थः। तथा च केवलान्वयिसाध्यकेऽव्याप्तिर्दुरुद्धरैवेति भावः।
नन्वव्यभिचरितत्वं व्याप्तिरित्यसंगतं तत्र यौगिकं अपि तु पारिभाषिकं न च लक्षणं वंतः साध्यतावच्छेदकावच्छिन्नाधिकरणावृत्तित्वमधिकरणधर्मानवच्छिन्नप्रतियोगिताकत्वोभयाभावविशिष्ट।

मु॰ टी॰
११

अभावाः प्रत्येकं तत्तत्सजातीयान्यत्वादिनाऽर्थितमेवेत्यत आह प्रतियोग्यप्रसिद्ध्यादिना प्रतियोगितावच्छेदक इति । मानाभावादिति शेषः तथा च मानाभावात् व्यधिकरणधर्मावच्छिन्नप्रति
योगिताकाभावाप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभावात् केवलान्वयिसाध्यकहेतावुपदर्शितलक्षणागमनासंभवेन तत्र तादृशलक्षणाव्याप्तिर्दुष्परिहरैवेति भावः ।
ननु मानाभावाद्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावो नांगीक्रियते इत्युक्तमयुक्तं घटत्वेन पटो नास्तीति प्रत्यक्षस्यैव तत्र मानत्वादित्यत आह न हि शेषेति । प्रतियोगितावच्छेदकविशि
ष्टप्रतियोगीत्यर्थः । अभावधीति । अभावलौकिकप्रत्यक्षे इत्यर्थः । तथा च प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्ध्या तज्ज्ञानासंभवेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव
प्रत्यक्षस्यानुपपत्त्या न तत्र मानत्वसंभव इति भावः । नन्वभावलौकिकप्रत्यक्षं प्रति न प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं हेतुः अपि तु प्रतियोगितावच्छेदकप्रतियोग्युभयविषयकं ज्ञा
नं तत्र हेतुः तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षस्यानुपपत्तिः । तत्र घटपटादिविषयकाद्विसमूहालंबनस्यैव तादृशस्य संभवादित्यत आह अन्यथेति । तथाविधोभयविषयकज्ञा
नस्य तत्र हेतुत्वे इत्यर्थः । निर्विकल्पकापत्तेरिति । घटघटत्वोभयविषयकनिर्विकल्पकादपीत्यर्थः । विषयतानभ्युपगमात् ज्ञानानुपपत्तिरिति भावः । नन्वेवं सति कथं गवि शशशृंगं नास्तीत्याकारकस्य राम॰ ११

शशीयत्वावच्छिन्नशृंगनिष्ठप्रतियोगिताकाभावविषयकप्रमात्वस्योपपत्तिरित्यत आह शशविशेषशृंगं नास्तीत्यादि। शशीयत्वेन शृंगाभावप्रतियोगितावच्छेदकत्वमप्यस्यासि
द्धमित्यर्थः। अतो न सिद्ध्यसिद्धिव्याघातप्रसंगः। ननु तथापि शशशृंगं नास्तीति प्रतीतिबलादेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावसिद्धिरित्यत आह शशशृंगं नास्तीति चे
त्। शशशृंगं नास्तीति प्रमत्वस्यासमर्थः। शशे शृंगाभाव इति विषय इति शेषः॥ तथा च नाद्यशप्रमत्वस्यैव शशे शृंगत्वावच्छिन्नप्रतियोगिताकाभावविषयत्वेनैवोपपत्तेर्न व्यधिक
रणधर्मावच्छिन्नप्रतियोगिताकाभावसाधकत्वमिति भावः। नन्वभावलौकिकप्रत्यक्षे प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं हेतुः तथा सति इत्यसाद्विनाघटादिज्ञानं घटघ
टत्वनिर्विकल्पकादितोपि घटो नास्तीति प्रत्यक्षापत्तेः॥ तेषामपि वस्तुतो घटत्वविशिष्टविषयकत्वात् न चैतत्रातिरिक्तघटत्वविशिष्टविषयतानभ्युपगमात्तानुपपत्तिरिति वाच्यं अति
रिक्तविषयतायां मानाभावात् अपितु प्रतियोगितावच्छेदकप्रकारकप्रतियोगिविषयकज्ञानत्वेन तत्र हेतुत्वं तथा च घटत्वप्रकारकपटत्वावच्छिन्नविशेष्यकभ्रमाद्घटत्वेन पटो नास्तीत्याका
रकप्रत्यक्षस्योत्पत्तौ बाधकाभावे न व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षं प्रमाणाभावादाहृतमेवेति चेन्न तथाप्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानभ्युपगमेव्य

मु॰टी॰ १२ धिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वं लौकिकप्रत्यक्षं प्रतिप्रतियोगिमावच्छेदकप्रकारकज्ञानस्य हेतुत्वमेव न कल्प्यते कुतः प्रतियोगितावच्छेदकप्रकारकतया विधत्तान वत्ताद्वृत्ते
न घटो नास्तीत्याकारकप्रत्यक्षोत्पत्तिरिति तादृशप्रत्यक्षस्यापि धात्वधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोऽसिद्ध एव। यद्विषयत्वेन घटो नास्तीत्यभावप्रत्यक्षं प्रसिद्धं तत्यापित
न्नमात्मकमेव प्रत्यक्षं। नेनाभयाविधाभाववत्प्रतियोगितावच्छेदकत्वकल्पने गौरवादित्यादिकं च सूक्ष्मतरस्वयमूहनीयं। प्रकारान्तरेण व्याप्तिलक्षणमाशंक्य निराकरोति अथेति। साध्या
समानाधिकरणत्वं साध्याधिकरणावृत्तित्वं। अनधिकरणत्वं अभाववत्त्वं अधिकरणतानाति वेशप्रयोजनाभावात् विशेषणताविशेषसंबंधेन तद्वत्ताभाव यत्साधिकरणत्वं तथा च सा
ध्याधिकरणावृत्तित्वाभाववत्त्वं व्याप्तिरिति साध्यासमानाधिकरणोत्पादिलक्षणकार्थः। केवलान्वयिसाध्यके साध्यासामानाधिकरण्याप्रसिद्ध्याव्याप्तिं न प्रसिद्ध्याप रिहरति साध्यास
मानाधिकरणोत्पादि। साध्यासमानाधिकरणत्वं हीति। साध्यानधिकरणाधिकरणत्वे साध्यानधिकरणमेवाधिकरणं यस्य तत्त्वं साध्यानधिकरणावृत्तित्वमिति यावत्। साध्याधिकरणान
धिकरणत्वं साध्याधिकरणमेवानधिकरणं यस्य तत्त्वं साध्याधिकरणावृत्तित्वमिति यावत्। आद्यं दूषयति। केवलान्वयिनीति। साध्यानधिकरणाप्रसिद्ध्येति शेषः। द्वितीयं दूषयति पक्षे किंचि राम॰ १२

द्रितिमहानसीयवह्न्याद्यधिकरणावृत्तिपर्वतीयधूमादौ विपर्ययः। अप्रसिद्धेति साध्यानधिकरणावृत्तित्वाप्रसिद्ध्या साध्याधिकरणावृत्तित्वाभावाप्रसिद्ध्या चेत्यर्थः। अत्र यथासंख्यं के
वलान्वयिनीत्यादावन्वयः ४। तथा च साध्यानधिकरणावृत्तित्वघटितलक्षणे केवलान्वयिसाध्यके ऽव्याप्तिः ४ साध्याधिकरणावृत्तित्वघटितलक्षणे तु नामावत्तिसाध्यके ऽव्याप्तिरिति तदुभया
न्यतरघटितलक्षणमशुद्धमिति भावः ४। इदमुपलक्षणं। साध्याधिकरणावृत्तित्वघटितलक्षणे ऽद्रयंसत्वादित्यादावतिव्याप्तिरपि द्रष्टव्या। नापि स्वेति। अत्र स्वपदं हेतुतावच्छेदकावच्छिन्न
हेतुपरं। साध्यपरं साध्यतावच्छेदकावच्छिन्नसाध्यपरं। तथा च यद्धर्मावच्छिन्नाधिकरणवृत्त्यन्ताभावाप्रतियोगी यद्धर्मावच्छिन्नं तद्धर्मावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्ननिरूपितात
द्धर्मावच्छिन्ननिष्ठा व्याप्तिरिति निष्कर्षो बोध्यः ४। पर्वतीयवह्नेः ४। वह्नित्वावच्छिन्नपर्वतीयवह्नेः। महानसीयधूमस्य। धूमत्वावच्छिन्नमहानसीयधूमस्य। तथा च वह्निमान् धूमादित्यादाव
व्याप्तिरिति भावः। ननु यद्धर्मावच्छिन्नाधिकरणवृत्त्यन्ताभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्येव लक्षणं वाच्यं अत्र च नोपदर्शित

स्थलेऽव्याप्तिः। धूमवति वह्निर्नास्तीत्यप्रतीत्या वह्नित्वस्य धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वादित्यतः संयोगी द्रव्यत्वादित्याद्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमा
ह द्रव्यत्वादेरित्यादि। अव्याप्यवृत्तेरिति संयोगादिमत्यर्थः। प्रतियोगिविरोधित्वमिति प्रतियोग्यधिकरणावृत्तित्वमित्यर्थः। व्याप्यवृत्तित्वमिति अवच्छिन्नवृत्तिकान्यत्वमित्यर्थः। अभावविशेषणं हे
तुसमानाधिकरणाभावविशेषणं। तथाच संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य प्रतियोग्यधिकरणवृत्तितयावच्छिन्नवृत्तिकतया च लक्षणाघटकत्वेन नाव्याप्तिरिति भावः। अनैकान्तिकत्वा
भावप्रसंगात्। व्यभिचारित्वाभावप्रसंगात् व्याप्यत्वप्रसंगादिति यावत्। उपदर्शितरीत्या संयोगाभावस्य तत्र लक्षणाघटकत्वे तथा संयोगसत्त्वादित्यादावपि व्याप्तिरिति भावः। ननु अधिकर
णभेदेनाभावभेदवादिमते गुणादौ द्रव्यवृत्तिसंयोगाभावभिन्न एव संयोगाभावस्तथा च संयोगी सत्त्वादित्यादौ नातिव्याप्तिः। अत्र गुणादिवृत्तिसंयोगाभावस्यापि प्रतियोग्यधिकरणवृत्तितया
लक्षणाघटकत्वादित्यत आह नहीत्यादि प्रतियोगिविरोधी प्रतियोग्यधिकरणावृत्तिः। अपरः द्रव्यवृत्तिसंयोगाभावभिन्नः। अभावभेदाभावादिति। प्रमाणाभावादिति शेषः। न च व्याप्यवृत्तित्वव्या
प्यवृत्तित्वादिरूपविरुद्धधर्माध्यासवशात् तयोर्भेद आवश्यक इति वाच्यं। यतः संयोगाभावेऽवच्छिन्नवृत्तिकत्वावच्छिन्नवृत्तिकान्यत्वरूपविरुद्धधर्मद्वयं नाङ्गीक्रियते येन तदध्यासात्तत्र भेदोऽनुपेय ४। राम०
१३

अपि तु गुणत्वादिमत्त्वाभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वं द्रव्यत्वस्याभावप्रतियोगित्वरूपाव्याप्यत्वं च तत्राप्युपेयते तदुभयं च न विरुद्धं गुणत्वाधिकरणत्वादेनयोः सत्त्वादित्यादिकं स्वयमूहनीयं । अ
त्यन्ताभावघटितलक्षणं द्रव्यपित्वाऽसोऽन्योन्याभावघटितमपि द्रव्यवृत्तितापीत्यादि । साधनवन्निष्ठान्योन्याभावाप्रतियोगी साध्यवान् यस्य साधनस्य तत्त्वमित्यर्थः । तदन्योन्याभावस्यापि कपिसंयोगव
दन्योन्याभावस्यापि । तत्र । कपिसंयोगवति । तथा च कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरिति भावः । एवं । कपिसंयोगवति कपिसंयोगवद्भेदस्वीकारे भेदाभेदः । भेदे सहितो भेदाभावः । एकत्रय
सम्प्रतीतेरिति शेषः । संयोगवद्भेदवति संयोगवद्भेदाभावरूपसंयोगस्याविद्यमानत्वादिति भाव ४ ॥ ननु यथा शिखीति नयद्रूपत्र शिखात्वध्वंसः प्रतीतेर्विषयः तथाऽयं वृक्षः कपिसंयोगी मूलेनेति प्र
तीतेरपि कपिसंयोगात्यन्ताभाव एव विषयोऽस्तु तथा चान्योन्याभावस्याव्याप्यवृत्तित्वे मानाभाव इति चेन्न । यतो बाधकप्रतीतिसत्त्व एव प्रतीतेर्विशेषणाभावो विषयः सविशेषणे हि विधिनिषेधौ वि
शेषणमुपसंक्रामतः सति विशेष्यबाधे इति न्यायात् । तथा च शिखी न यद्रूपे योऽनन्यद्रूपे इति बाधकप्रतीतिसत्त्वात् । शिखी न यद्रूपत्रादावस्तु शिखाध्वंस एव प्रतीतेर्विषय ४ । अयं वृक्षः कपिसं
योगी मूलेनेति प्रतीतेस्तु विशेषणात्यन्ताभावविषयकत्वकल्पने युक्तिं न पश्यामः । बाधकप्रतीत्यसत्त्वादिति कपिसंयोगवद्भेद एव तद्विषयो वाच्य ४ । अत एव नञ्पदाघटितपदार्थावबोधद

मु॰ री॰
१५
15

र्मावच्छिन्नेयेन संबंधेन यद्धर्मावच्छिन्नं बोध्यते नञ्यद्समभिव्याहृततादृशवाक्यात् तद्धर्मावच्छिन्नेतत्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावो बोध्यते इत्यर्थः अधिकाप्रतियोगपभावान्व
यबोधौ तुल्ययोगक्षेमाविति व्युत्पत्तिरपि संगच्छत इति। अत्र यानञ्पदासमभिव्याहृतात्कपिसंयोगी वृक्ष इति वाक्याद् वृक्षत्वेनाधारतासंबंधेन कपिसंयोगवत्त्वप्रकारकबोधः मूले वृक्षः कपिसंयो
गी नेति वाक्यात् कपिसंयोगाभावप्रकारकबोध इति सा व्युत्पत्तिर्विरुद्धेति नित तथा च तादृशप्रतीतेः कपिसंयोगवद्भेदान्योन्याभावविषयकत्वावश्यकत्वे अन्योन्याभावस्याप्यव्याप्यवृत्तित्वमावश्यकमित्या
दि वक्ष्यदीधितौ वक्ष्यमाणमनुसंधेयं। अन्योन्याभावस्याप्यव्याप्यवृत्तित्वाभ्युपगमेपि दोषमाह साधनवन्निष्ठेत्यादि। व्याप्यव्यापकभावो व्याप्यव्यापकैर्निरूपकतासंबंधेन भावः। निरूपकतासंबंधेन सा
ध्यनिष्ठव्याप्यतेति यावत्। तन्निरूपणात्। उक्तप्रकारातिरिक्तरूपेणानतिरूपणासंभवात् तथा च यत्र न अभिलक्षणस्य तत्र तत्र व्याप्तिघटितत्वेनात्माश्रय इति भावः। ननु साध्यसेन षष्ठ्यर्थः अ
पि तु सामानाधिकरण्यं न तथा च नात्माश्रय इत्यतो दोषांतरमाह साध्यसाधनयोरिति भावप्रधाननिर्देशः। न तथा च साध्यस्य साधनत्वयोरित्यर्थः। व्याप्तिनिरूप्यत्वात्। व्याप्तिघटितत्वात्। व्याप्तिनिरूपक
त्वं साध्यत्वं। व्याप्याश्रयत्वं साधनत्वमिति भावः। ननु पक्षसमानाधिकरण्यान्योन्याभावाप्रतियोगियद्धर्मसामानाधिकरण्यं तन्निष्ठा व्याप्तिरिति साधनत्वसाध्यत्वे अनिवेश्य यत्तद्घटितमेव लक्षणं वा राम०
१५

ध्यमतोनोक्तानुपपत्तिरिति तत्राह वह्निमद्भिन्नत्वादित्यादौ वह्निमान्धूमादित्यादौ च व्याप्तिरिति भावः। ननु साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वानवच्छेदकं यत्साध्यतावच्छेद-
कं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्येव लक्षणं परिष्करणीयम्। अत्र च वह्निमान्धूमादित्यादौ नाव्याप्तिः धूमवान्वह्निमान्नेत्यप्रतीत्या वह्नित्वस्य तथाविधप्रतियोगितानवच्छेदकत्वादित्यत आह वि-
शेषाभावकूटेत्यादि। विशेषाभावकूटस्येव। नतु वह्निर्नास्तीति वह्नित्वावच्छिन्नवन्मेदकूटस्येव। अभावे व्यवहारोपपत्तौ। न वह्निमानित्यादिप्रतीत्युपपत्तौ। सामान्याभावे। वह्नित्वात्मकसामान्यधर्मावच्छिन्नप्रतियोगिता-
वच्छेदकताकोनिरिक्तात्यन्ताभावेन तथा च विशेषधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदस्येव सामान्यधर्मावच्छिन्नप्रतियोगितावच्छेदकताकत्वे वह्नित्वस्य धूमाधिकरणवृत्तितत्तद्वह्निमद्भेदप्रति-
योगितावच्छेदकतावच्छेदकत्वाभावाद्दर्शितलक्षणे वह्निमान्धूमादित्यादौ व्याप्तिरिति भावः। लक्षणान्तरं दूषयति नापीति। अत्र साधनसमानाधिकरणयावन्तो धर्मास्तन्निरूपितवैयधिकरण्यानन-
धिकरणं यत्साध्यं तेन साध्येन सामानाधिकरण्यं व्याप्तिरिति लक्षणवाक्यार्थः। वह्निमान्धूमादित्यादौ तथाविधयावद्धर्मान्तःपातिपर्वतत्वमहानसत्वादिवैयधिकरण्यानधिकरणत्वस्य कस्या-
प्यसत्त्वाल्लक्षणासमन्वयः। धूमवान्वह्नेरित्यादौ तथाविधयावद्धर्मान्तःपात्ययोगोलकत्ववैयधिकरण्यानधिकरणत्वस्य धूमे सत्त्वादतिव्याप्तिः। नन्वेतद्वैयधिकरण्यं तदनधिकरणत्वमेवेत्ये-

व्याप्यवन्निष्ठमान्यस्मादित्यादौ लक्षणाव्याप्तिः। तथाविधयावद्धर्माणां पर्वतत्वचत्वरत्वादीनामेकाधिकरणाप्रसिद्धेः। न चाप्रत्येकं तथाविधयावद्धर्माणां यदधिकरणं तन्नाभिन्नवृत्तित्ववि
वक्षणान्नदोष इति वाच्यं। तथा सति द्रव्यं पृथिवीत्वात्वादित्यादावव्याप्तेः तथाविधयावद्धर्मान्तःपातिघटत्वानधिकरणपटादिवृत्तित्वाद्धूमवत्त्वेति। न च तथाविधयावद्धर्मानधिकरणमा
त्रवृत्तित्वे विवक्षणीयमिति वाच्यं। रूपवान् पृथिवीत्वादित्यादावव्याप्तेः। घटीयरूपे पृथिवीत्वसमानाधिकरणाय घटत्वानधिकरणमात्रवृत्तित्वं घटीयरूपे पृथिवीत्वसमानाधिकरणघटत्वानधिक
रणमात्रवृत्तित्वसत्त्वेऽपीति सर्वरूपे तथाविधयावद्धर्मानधिकरणमात्रवृत्तित्वसत्त्वात्। अथ तथाविधयावद्धर्मानधिकरणमात्रवृत्तितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिक
रण्यं व्याप्तिः। अवच्छेदकत्वमत्रानतिरिक्तवृत्तित्वं धूमत्वादौ तथाविधस्य स्वरूपसंबंधरूपावच्छेदकत्वस्य सत्त्वेऽपि मानाभावेन धूमवान् वह्नेरित्यादावतिव्याप्तेः। तच्च तदभाववद्वृत्तित्वं तथा च रूपवान् पृथिवी
त्वादित्यादौ नाव्याप्तिः। तथाविधघटत्वपटत्वानधिकरणमात्रवृत्तित्वाभाववति घटपटरूपादौ रूपत्वस्य वृत्तितयातिरिक्तत्तथाविधावच्छेदकत्वस्य संत्वात्। पटत्वावच्छेदकत्वमनतिरिक्तवृत्तित्वं त
च्च तद्भावसमानाधिकरणवृत्तित्वं वा। धर्मत्वं वृत्तिमत्त्वं। अत्र वृत्तिमत्त्वरूपधर्मत्वानिवेशे द्रव्यवान्मेयत्वादित्यादावतिव्याप्तेः। तथाविधयावद्धर्मान्तःपातिगुणत्वानधिकरणमात्रवृत्तित्वाभाववति गगनादौ

द्रव्यत्वस्य सत्त्वेन निरुक्तावच्छेदकत्वस्य भ्रमत्वसत्त्वादिति । न च सत्तायत्तत्तद्यावद्विषयावद्धर्मानधिकरणमात्रवृत्तित्वमित्यस्य तथाविधयावद्धर्मानधिकरणे न रत्नवृत्तित्वे सति तथाविधयावद्धर्मानि-
धिकरणवृत्तित्वं नार्थः । विशेष्यदलनिवेशप्रयोजनाभावात् अपि तु तथाविधानवृत्तित्वमात्रं तथा च तत्र धर्मनिवेशोऽतिव्याप्तेरनवकाशः गगनादौ तथाविधानवृत्तित्वाभावाभावादिति धर्मपदघटितं
तथाविधावच्छेदकत्वनिर्वचनं निरर्थकमेवेति चेन्न । तथापि गुणत्वमस्तित्वविशिष्टसत्त्ववान् ज्ञातेरित्यत्रातिव्याप्तेः तथाविधयावद्धर्मानि: यावन्निगुणत्वाद्यनधिकरणमात्रवृत्तित्वस्य स-
त्त्वात् तथाविधविशिष्टसत्ताया अप्रसिद्ध्या तथाविधानवृत्तित्वाभावात् विशिष्टनिरूपिताधेयताया अतिरिक्तत्वाभावादिति चेन्नैवं । साधनसमानाधिकरणयावन्तो धर्मास्तन्मध्ये कानधिकरणमात्रे यद्धर्मावच्छिन्नाधिक-
रणता तद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यस्य पञ्चमे तद्विवक्षितत्वात् विशिष्टाधिकरणताया अतिरिक्तत्वेनाननुगमप्रसङ्गाभावादिति । ननु व्याप्तेरविशिष्टत्वेन धर्मविशि-
शेषणीभूतस्य तस्य आहुर्महानसीयवह्न्यादिः समवायितया समवायेनानवच्छिन्नतया तथाविधयावद्धर्मवैयधिकरण्येन तथाविधयावद्धर्माभाववद्वृत्तित्वेन तथाविधयावद्धर्मानधिकरणवृत्तित्वं वा ।
उभयथापि वह्निमान्धूमादित्यादावव्याप्तिः । तथाविधयावद्धर्मान्तःपातिनो वह्न्यादेः समवायेनाभाववत्त्वात् समवायेन तद्वतोऽस्मात्प्रमाभाववत्त्वाच्च महानसीयत्वेन हेतुत्वेन निरुक्तवैयधिकरण्यस्य

मु॰ टी॰
१६
16

तत्रसत्वादितिभावः। अत्रयेनसंबंधेनहेतुसमानाधिकरणयावन्तोधर्मास्तेनसंबंधेनतावद्धर्मानधिकरणीयमहद्वृत्तित्वमितिविपाधिकरणत्वांननिष्कर्षेतुनायंदोषइत्यवधेयं। आचार्यत्विष्टलक्षणा
माशंकतेअथेति। अत्रानौपाधिकत्वं उपाध्यभाववत्वं संबंधः। साध्यसामानाधिकरण्यं तथा तौपाध्यभावविशिष्टसामानाधिकरण्यंव्याप्तिरितिवाकार्थः। वन्हिमान्धूमादित्यादावुपा
ध्यसत्वेनलक्षणासमन्वयः। धूमवान्वन्हेरित्यादावार्द्रेंधनादिरूपोपाधिसत्वान्नातिव्याप्तिः। उपाधित्वनिर्वचनंविनानदूरितलक्षणासंभवात्तन्निर्वक्ति उपाधिरित्यादि। ननुव्यापकत्वंव्याप्ति
रूपकत्वंतत्त्वविषयव्याप्तित्वमप्यनौपाधिकत्वान्तरविशिष्टसामानाधिकरण्यरूपं। तथाचानवस्थायसंगइत्यतस्तन्निर्वक्ति। व्यापकत्वेत्यादि। अप्रतियोगित्वंप्रतियोगितानवच्छेदकधर्म
वत्वं। अन्योन्याभावादिकमादायसर्वत्रतथाविधाभावप्रतियोगित्वेपितत्क्षतिः। तथाचसाध्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्वेसतिसाधनाधिकरणवृत्त्यभावप्रतियोगितावच्छेद
कंपघनत्वछिन्नप्रतियोगिताकाभाववत्वेसतिसाध्यसामानाधिकरण्यंव्याप्तिरितिलक्षणार्थपर्यवसन्नं। अत्राभावयोरेकसंबंधावच्छिन्नत्वंविवक्षणीयमितिनविभिन्नसंबंधमादायानुपपत्तिरिति
भावः। ननुअत्रायपेनवन्हिवृत्तित्वयाद्धूमवान्प्रमेयत्वादित्यत्रातिव्याप्तिः। तत्रसाध्यसमानाधिकरणयावद्धर्माणांसाध्यतयानिरुक्तोपाधेरभावात्साध्यंयन्नोपाधिरितिप्रवाहेनोपाधित्वक्षणेसाध्य रा॰ म॰
१६

स्योपाधित्वे बाधकाभावे न तस्यैव तत्रोपाधितयाः निरुक्ताग्नेरभावस्तु निभावः । न स्वत्वप्रतियोगित्वं तदभावव्याप्यत्वरूपविरोधित्वं अत्र सत्वाप्रसिद्धनोपाधिकत्वांतरविशिष्टसामानाधिकरण्यरूपेण
न वस्थात्तु वीरिवेसतन्न आह प्रतियोगित्वमित्यादि । सहानवस्थाननियमलक्षणं तदभावव्याप्यत्वरूपं विरोधित्वं प्रतियोगित्वं नेसर्गः । गोत्वाश्वत्वयोरतथात्वात् गोत्वाश्वत्वयोः परस्परं प्रतियोगित्वा
भावात् । गोत्वाश्वत्वयोरन्यतरस्यान्यतरप्रतियोगित्वाभावादिति यावत् तथा च तदभावव्याप्यत्वस्य न प्रतियोगित्वरूपत्वे गोत्वेऽश्वत्वप्रतियोगित्वापत्तिरिति भावः । लक्षणांतरमाह अन्योन्याभा
वेत्यादि । असत्वात् । निरुक्तप्रतियोगित्वस्यासत्वात् । घटवति भूतले घटान्योन्याभावस्य विद्यमानत्वादिति शेषः । न यावदन्योन्याभावप्रतियोगितत्तदभावाव्याप्यतया तत्र लक्षणमव्याप्तमिति भावः ।
न च न तत्संबंधावच्छिन्नप्रतियोगिताकतदभावाभावस्य तत्संबंधावच्छिन्नव्याप्यत्वेन तत्संबंधावच्छिन्नतदभावप्रतियोगित्वमिति प्रतियोगितावच्छेदकसंबंधनियंत्रितप्रतियोगित्वलक्षणाकरणान्नानुपप
त्तिरिति वाच्यं तथा सत्यन्योन्याभावप्रतियोगितावच्छेदकानिसामेः संयोगसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावप्रतियोगिमांसत्तायामप्रसिद्धेः संयोगसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावाभावाप्रसि
द्धेः । प्रतियोगित्वानुयोगित्वमिति । प्रतियोगित्वानुयोगितापदेति बहुव्रीहिसमासात् प्रतियोगित्वमर्थः स्वेति संयोगेन सत्तायाः अव्याप्तत्वादिति प्रतियोगाभावयोः स्वरूपसंबंधविशेष इति शेषः ।

मु.टी.
१७
17

अभावेति। तदभावाभावस्वेनातदभावप्रतियोगित्वमित्यर्थः। वाकारोत्रानास्थायामेकत्रस्वरूपसम्बन्धेनाभावप्रतियोगिमात्रे सम्बन्धाभावाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेन प्रतियोगित्वि
तदभावत्वाभावात्संयोगसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावप्रतियोगिमध्यात्रे अतस्य केवलान्वयितया तदभावाप्रसिद्धेः एवं तदभावाभावत्वमित्यस्य तदभावप्रतियोगिताकाभावत्वमित्यवाधि
वाच्यः। न चैवं तत्प्रावेशप्रतियोगित्वमपि यादृशतादृशान्तराऽनवस्थापादकं स्वस्वरूपसंबंधविशेषरूपत्वेन तु तादृशसर्वत्राव्यापकत्वात् स्वरूपसंबंधविशेषरूपप्रतियोगित्वमस्त्विति किमुपदर्शितरीत्या
तन्निर्वचनेनेति। आचार्यैरपि निरुक्तलक्षणं दूषयन्ति। यत्किंचिदित्यादिना। स्वमात्राविनितयाविधइत्यसारे तत्रसत्तान्तद्भिन्नमात्रस्वमादिसादावसंभवाय द्रव्यत्वादिति भावः। सिद्धासिद्धिभ्यां प्रसिद्ध
सिद्धिभ्यां निषेद्धुं प्रकृतलक्षणे अभावप्रतियोगित्वेन निवेशयितुं प्रकृतसाध्यव्यापकत्वे सति यत्तस्य साधनाव्यापकस्य प्रसिद्धत्वे हेतौ तदभावासत्त्वादप्रसिद्धत्वे वाऽलीकाभावानभ्युपगमेन तद
भावाप्रसिद्ध्या प्रकृतलक्षणेऽसंभवापत्तेरिति भावः। शंकते यावदित्यादिना निषिध्यते निवेश्यते प्रकृतलक्षणेऽभावप्रतियोगित्वेन निवेश्यते। अत्राभावे समभ्यप्रविशितितापा अन्वयः। तथा च
साध्यव्यापके यावति साधनाव्यापकत्वाभावस्तत्त्वं साधनाव्यापके यावति साध्यव्यापकत्वाभाववत्त्वं वा प्रकृते अनौपाधिकत्वं व्याप्तिमिति भावः। व्यभिचारग्रहत्वाभावादिति हेतुनिष्ठसाध्यसामानाधिकरण्य

राम०
१७

स्यानधिकरणाद्वृत्तित्वात् तथा च वह्निमान्धूमादित्यादौ व्याप्तिः प्रमेयत्वादिनिष्ठतथाविधाभावविशिष्टसाध्यसामानाधिकरण्यस्यानधिकरणाद्वृत्तित्वात् तथा च वह्निमान्धू) स्यद्महाव्यभा
वादितिभावः। वैयधिकरण्यमुद्धर्तुमाशंकते यावदिति। यत्साध्यस्यापत्तसाधनसमानाधिकरणसाध्यस्यापत्त्य। यत्साधनस्य। तत्। अनौपाधिकत्वं। न व्याप्तसाधनाव्यापकं यावत् व्यापकत्वसा
ध्यसामानाधिकरण्यं साध्यव्यापकव्यावृत्तायकत्वं वा प्रकृते। नौपाधिकत्वं व्याप्यमतो नानौपाधिकत्वस्य हेतुनिष्ठसाध्यसामानाधिकरण्यवैयधिकरण्यापत्तिरिति भावः। सोपाधेः। व्यभिचा
रिहेतोः। तथात्वात्। निरुक्तानौपाधिकत्वस्य हेतुनिष्ठसाध्यसामानाधिकरण्यवैयधिकरण्यापत्तिरिति भावः। सोपाधेः सत्वात्। तथा च धूमवान्वह्नेरित्यादौ व्यभिचारिण्यतिव्याप्तिरिति भावः।
ननु हेतोपपादयति तथा हीत्यादि। प्रकारान्तरेणानौपाधिकत्वमाशंक्य निषेधति नापीत्यादि। साध्यं यावतामव्यभिचारित्वावतामव्यभिचारित्वमनौपाधिकत्वमित्यर्थः। अव्यभिचारित्वमत्र न द्रुमा
ववद्वृत्तित्वं बोध्यं नहि लाघवात् साध्याव्यभिचारित्वमेवानौपाधिकत्वमस्त्वित्याशयेनाह साध्याव्यभिचारित्वस्यैवेति लाघवेनेति शेषः। गमकत्वसंभवात्। अनुमितिप्रयोजकत्वसंभवात् तथा च
लाघवात् साध्याभाववद्वृत्तित्वरूपाव्यभिचारित्वमेवानौपाधिकत्वमस्त्विति भावः। अत्रैवापत्तोद्धषणमाह नत्वेवमिति साध्याभाववद्वृत्तित्वरूपाव्यभिचारित्वमित्यर्थः। दूषितमिति केवलान्वयिन

मु.टी.
१८
18

व्याप्तेर्निवेशः। नन्वेवं सति गुरुतरोपदर्शितमव्याप्योपाधिकत्वमस्ति निवारयितुं तथापि केवलान्वयिन्यव्याप्तेः पदमावश्यकत्वाद्वि प्रमेयत्वादिकं तत्पदार्थस्याप्रसिद्धेरिति भावः। लीलावतीकारोक्तं लक्षणमाशं
क्य निषेधयति नापि केति। नेमिति विशेषणतोक्तनीयां तयावत्कालविशिष्टेनेत्यर्थः। कात्स्न्यं। पावत्वं। संबंधः सामानाधिकरण्यं तत्र यावद्यावत्तासह सामानाधिकरण्यं व्याप्तिरिति यद्यपि विशिनो
र्यः। अत्र यावत्त्वं साधनेन साध्येन साधनाश्रयेण साधनसमानाधिकरणधर्मेण विशेषणानामित्यत्राद्ये यावत्ता साधनेन सह साध्यसामानाधिकरण्यं व्याप्तिरित्यर्थे दूषणमाह एकेत्यादि। एक
व्यक्तिके। एकव्यक्तिके हेतौ तदभावात् अनेकत्वरूपयावत्त्वाभावात्। न व्याप्तेरेकव्यक्तिकहेतावव्याप्तिरिति भावः। अत्रैव दूषणान्तरमाह नानेति। नानाव्यक्तिके हेतुस्थले वह्निमान्धूमादित्यादावित
र्यः। न व्याप्य वह्निमान्धूमादित्यादावव्याप्तिरिति भावः। द्वितीये हेतौ यावता साध्येन सह सामानाधिकरण्यं व्याप्तिरित्यर्थे दूषणमाह। अनन्वेवेति। एकव्यक्तिसाधके सकलसाध्याप्रसिद्ध्याऽव्याप्ते
रेवेत्यर्थः। कृत्स्नेन साधनतासंबंधाः सामानाधिकरण्यं। विषमव्याप्ते। वह्निमान्धूमादित्यादौ। तदभावात् कुत्रापि धर्मे सकलवह्निसामानाधिकरण्याभावात् न व्याप्यत्वं तत्राव्याप्तिरिति भावः। द्व
मुपलक्षणं। समव्याप्तेऽपि संख्यावान्परिमाणादित्यादौ कुत्रापि परिमाणे सकलसंख्यासामानाधिकरण्याभावादव्याप्तिर्द्रष्टव्या। तृतीये आश्रयेत्यादिना साधनाश्रयपाद्वृत्तिसाध्यसामानाधि राम०
१८

करण्यं व्याप्तिरित्यर्थपरिष्कारे दूषणमाह नचेत्यादि। आश्रितत्वं वृत्तित्वं संबंधः सामानाधिकरण्यं। आश्रितत्वाभावात् वृत्तित्वाभावात्। तथा च वह्निमान् धूमादित्यादावव्याप्तिरिति भावः। वस्तुर्थ
अध्याहारादिना साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थपरिष्कारे दूषणमाह नापीत्यादिना। यावद्धर्मेति साधनसमानाधिकरणयावद्धर्मेत्य
र्थः। यावत्त्वं धर्माधिकरणाधिकरणत्वं। साधनसमानाधिकरणयावद्धर्माधिकरणवृत्तित्वं। अप्रतीतेः। अप्रसिद्धेः। टीकाकारोक्तदूषणमाशंक्याह नैवमपीति। संबंधः साध्यसामानाधि
करण्यं। तथा च स्वाभाविकं साध्यसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः। अत्र स्वाभाविकपदार्थं विकल्प्य दूषयति स्वभावजन्यत्वमात्रादिना। स्वभावजन्यत्वे हेतुस्वरूपजन्यत्वं तदाश्रितत्वादिर्वा
हेतुस्वरूपवृत्तित्वादिर्वा स्वाभाविकत्वे इति शेषः। आदिपदग्राह्यं हेतुस्वरूपनिष्ठानारोपितत्वं। आत्माश्रयातिव्याप्तेरिति। अव्याप्तिसहितातिव्याप्तेरिति मध्यपदलोपिसमासात् द्रव्यं घटत्वादित्यादा
वव्याप्तेः द्रव्यत्वसत्त्वादित्यादावतिव्याप्तेश्चेत्यर्थः। अत्र यथासंख्यं दूषणद्वयमवगन्तव्यं। लक्षणांतरं दूषयति नापीति। अविनाभाव इति विना साध्येन तिष्ठति साध्याभाववन्निष्ठाभावो नियर्यस्य तमित्यद
त्यर्थः। व्याप्य इति शेषः। तथा च साध्याभाववद्वृत्तिभिन्नसंबंधाव्यापकत्वमिति पर्यवसितोऽर्थः। असंभवो साध्याभाववत्त्वे नवभेदान्न पूर्वोक्तसाध्याभाववद्वृत्तित्वं भिन्नमेतेनेत्यनन्तरमो। केवलान्वयिनि केवलान्व

मु.दी.
१९
19

पि साध्यवतोऽभावात् साध्याभावस्याभावस्याभावात् साध्यैः भावप्रतियोगित्वस्याभावादिति यावत् अन्येन सिद्धसिद्धिव्याघातः। तत्राद्ये इत्याद्यंशे पक्षादित्वादेः साध्याभावाप्रसिद्ध्याऽव्याप्तिरिति
भावः। लक्षणांतरमोपिकते। अथेति। संबंधमात्रं साध्यसामानाधिकरण्यमात्रं मात्रपदेनात्राव्यभिचारांशस्य व्यवच्छेदः। नन्वत्र द्रव्यं सत्वादित्यादौ सत्तायां द्रव्यत्वव्याप्यत्वापत्तिरित्यत्रेष्टापत्ति
मादव्यभिचारिमादि। सत्तादिनिष्ठद्रव्यत्वादिसामानाधिकरण्यस्यायामर्थः केनचित्सहव्याप्तित्वात्। किंचिद्रूपावच्छिन्नद्रव्यत्वनिरूपितव्याप्तिमत्वात् तथा च सत्तायामपि जातित्वेन द्रव्यत्वस्य व्याप्य
तया सत्तायां द्रव्यत्वव्याप्यत्वमिष्टमिति भावः। धूमादिव्याप्तिमत्कवह्नित्वावच्छिन्नादिनिरूपितधूमत्वावच्छिन्नादिनिष्ठव्याप्तिमत्त्व। विशिष्येति। धूमत्वावच्छिन्ननिष्ठवह्नित्वावच्छिन्ननिरूपितसामानाधि
करण्यं धूमत्वावच्छिन्ननिष्ठवह्नित्वावच्छिन्ननिरूपितव्याप्तिरित्येवं रीत्यैवेत्यर्थः। एवकारेणातन्मद्रूपावच्छिन्ननिष्ठतन्मद्रूपावच्छिन्नसामानाधिकरण्यस्य सामान्यलक्षणत्वव्यवच्छेदः। अन्यथा सत्तायां
द्रव्यत्वत्वावच्छिन्नसामानाधिकरण्यस्य व्याप्यत्वापत्तेरिति भावः। इदं व्याप्तिलक्षणोक्तावानुमितिजनकत्वव्यवच्छेदकं व्याप्तिपदस्य प्रवृत्तिनिमित्तं वा नत्वाद्येद्रूषणामाह लिंगे स्यादिति लिंगपरामर्शवि
षयव्याप्तिस्वरूपनिरूपणमस्याद्येत्‌ लिंगविशेष्यकव्याप्तिप्रकारकज्ञानविषयीभूतत्वेनाभासितव्याप्तिस्वरूपे निरूपणीयेऽलक्षणतामिधानस्यासाप्तिलक्षणाभिधानस्य। अर्थांतरत्वात् निराकांक्षि

राम.
१९

नाभिधानत्वात् तथा चानाकांक्षिताभिधानेति ग्रहस्थानापत्तिरिति भावः । द्वितीये दूषणमाह । नचैवमिति । नचेत्यर्थः । संबंधमात्रं साध्यसामानाधिकरण्यमात्रं । न पाऽनुमितिजनकतावच्छेदकं तत्
हेतुधर्म इति । व्यभिचारज्ञानदशायां साध्यसामानाधिकरण्यज्ञानादिप्रसंगः तथा च केवलसाध्यसामानाधिकरण्यज्ञानस्यानुमितिहेतुत्वे व्यभिचारज्ञानदशायां साध्यसामानाधिकरण्यज्ञानाद
नुमित्यापत्तिरिति भावः । नच व्यभिचारज्ञानाभावोऽप्यनुमितिहेतुरिति वाच्यं तथा सत्यपि व्यभिचारव्याप्यवत्ताज्ञानादिकाले साध्यसामानाधिकरण्यज्ञानमात्रादनुमित्यापत्तेः । नच तदभावोऽपि तत्र
हेतुरिति वाच्यं । तथा सति गौरवापत्तेः लाघवात् साध्याव्यभिचरितत्वविशिष्टसाध्यसामानाधिकरण्यज्ञानस्यैव हेतुत्वौचित्यात् इत्यादिकं बहुतरमस्मत्कृतो ग्रंथान्तरीये दूषणमाह नायीमादि । व्याप्तिपदप्र
वृत्तिनिमित्तं । तादात्म्येन व्याप्तिपदशक्यतावच्छेदकं । इदं साध्यसामानाधिकरण्यं संबंधमात्रे साध्यसामानाधिकरण्यमात्रे व्याप्तिपदप्रयोगात् व्याप्तिपदप्रयोगविषयत्वाभावात् तथा च व्याप्ति
पदप्रयोगविषयवृत्तितया तस्य न तन्मते शक्यतावच्छेदकत्वमिति भावः । कसंविज्ञानमाह केवलान्वयिनीति केवलान्वयिसाध्यकहेतावित्यर्थः । केवलान्वयिन्यपि संबंधः । केवलान्वयिन्यपि साध्यसामानाधिकरण्ये अ
त्र व्याप्तिरिति मतस्यानुषंगः । व्यतिरेकिणीति । व्यतिरेकिसाध्यकहेतौ । एतयोः । उपदर्शितव्याप्त्योः ॥ अनुमितिविशेषजनकत्वं अनुमितिविशेषनिष्ठकार्यतानिरूपितकारणतायां विषयिता संबंधे

पु दी
२०
20

नावच्छेदकत्वं। केवलान्वयिसाध्यकानुमितिं प्रति केवलान्वयिसाध्यसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्ताज्ञानं कारणं व्यतिरेकिसाध्यकानुमितिं प्रति तु साध्यवदन्यावृत्तित्वरूपव्याप्तिविशि
ष्टहेतुमत्ताज्ञानं कारणं वा अयं क्रमः परस्परव्यभिचारेण कार्यकारणभावकल्पनासंभवादिति भावः। नन्वेवं सत्यनुमितित्वं कस्य कार्यतावच्छेदकमित्यत आह अनुमितिमात्रेति मात्रपदं कृत्स्ना
र्थकं। तथा चानुमितित्वावच्छिन्नेत्यर्थः। यत्स्वधर्मनैयत्यप्रयोजिका। यत्स्वहेतिनैव विषयितासंबंधेन ज्ञानानि जनकतावच्छेदिका अनुमितित्वावच्छिन्नं प्रति पक्षवृत्तिताविषयकज्ञानत्वेनैव हे
तुत्वमिति भावः। अत्र वृत्तितायानिवेशप्रयोजकाभावात् अनुमितित्वावच्छिन्नं प्रति पक्षज्ञानत्वेनैव हेतुत्वमिति निष्कर्षो बोध्यः। पक्षत्वं चात्रानुमितिविधेयतावच्छेदकवत्त्वमिति ध्येयं। अ
तिप्रसंग इति। व्याप्तिविशिष्टहेतुमत्ताज्ञानाभाववत्यां पर्वतादिज्ञानादप्यनुमित्यापत्तिरित्यर्थः। विशेषसामग्र्यास्तित्यावयर्वितादिज्ञाने नानुमितिरूपेय फले जननीये केवलान्वयिसाध्य
सामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानसाध्यवदन्यावृत्तित्वरूपव्याप्तिविशिष्टहेतुमत्ताज्ञानयोरन्यतरस्य सहकारितया नोक्तापत्तिरिति भावः। नव्यास्तात्। सकलवह्निमद्भिन्नत्वात्। तथा च व
ह्निमान्धूमादित्यादावव्याप्तिर्दुरुद्धरैव सकलवह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदस्य पर्वतादेरप्यसत्त्वादेरिति भावः। इदमत्रतत्त्वं। सकलसाध्यवदन्योन्याभाववदवृत्तित्वेन व्याप्तिः। यत्तोपदर्शि राम०
२०

नरीन्यावन्हिमान्धूमादित्यादाव व्याप्तिः स्यात् अपि तु साध्यतावच्छेदकावच्छिन्नसाध्यनिरूपितप्रतियोगीनावच्छेदकतावच्छेदकभेदवद्वृत्तित्वं व्याप्तिः तत्र तु न मूलोक्तदोषावकाशः किं तु अत्र सोमाभाव
प्रतियोगीमानवच्छेदकत्वेरूप केवलान्वयिसंग्रह भ्रम इत्यापि चारज्ञानसंले केवलान्वयिसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानानुमित्यापत्तिवारणाय केवलान्वयिसा
ध्यकानुमितिं प्रतिनिरतं केवलान्वयित्वप्रकारक केवलान्वयिसाध्यविधेयकज्ञानं कारणं वाच्यं। एवं च सोमाभावप्रतियोगीमावच्छेदकत्वरूपव्यतिरेकित्वज्ञानकाले साध्यवदन्यावृत्तित्वरूपव्याप्ति
विशिष्टहेतुमत्ताज्ञानात् केवलान्वयिसाध्यकानुमित्युदये न केवलान्वयिसाध्यकानुमितिं प्रत्यभावप्रतियोगीनावच्छेदकत्वरूपव्यतिरेकित्वप्रकारक केवलान्वयिसाध्यविशेष्यकज्ञानस्यापि
हेतुत्वं कल्पनीयं एवं व्यतिरेकिसाध्यभेदेनाप्युपदर्शितकार्यकारणभावद्वयं कल्पनीयं तत्रापि पूर्वोक्तयुक्तेर्विशिष्टत्वादिति केवलान्वयिव्यतिरेकिसाध्यभेदेन कार्यकारणभावचतुष्टयमुपद
र्शितव्याप्तिद्वैविध्येन व्याप्तिज्ञानस्यापि कारणतारूपमिति कार्यकारणभावाष्टकं मावयपक्षे केवलान्वयिव्यतिरेकिसाध्यभेदेन व्याप्तिद्वैविध्यमतेऽपि यावन्महद्गौरवात् तदपेक्षया हेतुत्वाधिकरणाहेत
सोमाभावप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्यैवोपदर्शितसाध्यद्वयविधेयकानुमितिहेतुत्वकल्पनमुचितं उपदर्शितानंतकार्यकारणभावकल्पनापेक्षा

मु·टी·
२१
21

याकार्यकारणभावद्वयकल्पनेलाघवात्। न चैवं सति हेतुतावच्छेदकभेदेन कार्यकारणभावानंत्यकल्पने महद्गौरवमिति वाच्यं· पूर्वमतेपि निरुक्तव्याप्त्यनिर्वचनानुरोधेन हेतुतावच्छेदकविषयतानां नि[illegible]वे
श्यकार्यकारणभावकल्पनायाआवश्यकत्वेन हेतुतावच्छेदकभेदेन कार्यकारणभावद्वयकल्पनस्यावश्यकत्वात्। अन्यथा निरुक्तव्याप्तिनिर्वचनस्य महल्लगौरवग्रस्तत्वमित्यस्य व्युदासः प्रपंचितस्माद्दिति
सारं। पूर्वोक्तसाध्यत्वसाध्यत्वघटितयावद्धर्मसत्तानिष्ठमेकदेशेषेण हृदयपिसैकदेशेषेण हृद्यति। सर्वत्रेति। पूर्वोक्तसाध्यत्वसाध·नत्वघटितयावद्धर्मसत्तालिन्यर्थः। व्याप्तिनिरूपितेन। व्याप्तिघटि
तत्वेन। व्याप्तिनिरूपकत्वं साध्यत्वं व्याप्याश्रयत्वं साधनत्वमिति भावः। साध्यत्वेन व्याप्तिनिरूपकत्वमपि तु सिद्धिकर्मत्वादिस्वरूपेण त्याचक्ष साध्यत्वमाहाय्याप्याश्रय इत्याशंकामपनेतुमाह साध्य
त्वमित्यादि सिद्धिकर्मत्वमनुमितिविषयत्वं। सिसाधयिषा अनुमितिविषयके च्छान्तरभावात् पर्वतो वह्निमानित्यनुमितिविषयत्वाभावात्तत्र पर्वते वह्न्यनुमितिर्जायतामितीच्छाविषयत्वाभावाच्च
न याचपर्वतो वह्निमानस्तु मा हित्यादौ महानसीयवह्नेः साध्यत्वं न स्यादिति भावः। तटस्थः शंकते नन्विति· सामान्यतः व्याप्तिपरत्वाश्लेषेन पक्षस्य तत्त्वमिति हेतुव्याप्तिज्ञाने का व्याप्तिरिति। जिज्ञासा:
अन्यथा व्याप्तिपरत्वाश्लेषेण व्याप्तिज्ञानाभावे हृदूषणेन। अतिव्याप्त्यादिदूषणेन। असाधकतां साधयेत्। उक्तव्याप्तीनामनुमितिप्रयोजकतानुगमाभावे तत्प्रत्याख्यानं व्याप्तिनिरूपणेनेति भावः। राम·
२१

स्वार्थानुमानोपयोगित्वादिस्वीयशिष्यस्यानुमितिरूपप्रयोजनसंपादकं यद्व्याप्तिज्ञानं तदुपयोगीयद्व्याप्तिस्वरूपनिरूपणं तन्न हि ना। कुपायांस्तु शिष्यस्य विचारे। अग्रे वेशान्तप्रवेशाभावात्। हेतुप्रयोग
संभवात् तद्व्याप्तिज्ञानं विना तस्य सद्धेतुत्वज्ञानासंभवादिति शेषः। तथा च न केवलं परस्य व्यतिरेक्यर्थव्याप्तिनिरूपणे अपि तु स्वशिष्यस्य व्याप्तिज्ञानार्थमपीति भावः॥ ॥इति चिंतामणिटीकायां
व्याप्तिपूर्वपक्षरहस्यं॥ ॥सिद्धान्तयति प्रतियोग्यसमानाधिकरणेत्यादि। यत्संबंधेन हेतुतावच्छेदकावच्छिन्नं यत्प्रतियोगितावच्छेदकावच्छिन्नं न भवतीत्यस्य न व्यत्यासेन साध्यतावच्छेदकपराघा
हारेणात्र प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नमित्यर्थः। तथा च प्रतियोग्यसमानाधिकरणपदे हेतुतावच्छेदकावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यत्साध्यताव
च्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं न हेतुतावच्छेदकावच्छिन्ननिष्ठतत्साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिरिति समुदितलक्षणवाक्यार्थः। धूमत्वावच्छिन्नवृत्तिर्यत्ताहोवह्नित्वावच्छिन्न
प्रतियोगिताकाभावासत्त्वेन तथाविधघटत्वावच्छिन्नाभावसत्त्वात् तादृशाभावप्रतियोगितानवच्छेदकत्वाद्वह्नित्वादेरिति वह्निमान्धूमादित्यादौ लक्षणसमन्वयः। वह्निमत्पयोगोलकादौ धूमत्वावच्छिन्ना
भावसत्त्वात् धूमत्वादेस्तथाविधाभावप्रतियोगितानवच्छेदकत्वाभावेन धूमवान्वह्नेरित्यादौ नातिव्याप्तिः। कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणाय प्रतियोग्यसामानाधिकरणपदम्।

मु॰ टी॰
२२

च विशेषणतांतच्च प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वं । अत्र मनस्त्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादावतिव्याप्तिवारणाय प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशः । अस्य चाप्रतियोगिमूर्त्तत्वाधिक
रणमनोवृत्तेस्तादृशाभावस्य लक्षणाघटकतया तत्रातिव्याप्तेर्दुरुद्धरत्वात् । अथ यथा गुणकर्मान्यत्वविशिष्टसत्ताभावाज्जातेरित्यादावतिव्याप्तिवारणाय तत्पदं तु वक्ष्यमाणरीत्या प्रतियोग्यधिकरणतायाः साध्यता
वच्छेदकसंबंधेनावश्यं विवक्षणीयतया प्रकृते द्रव्यमात्रवृत्तिविलक्षणाधिकरणतामादाय साध्यतावच्छेदकसंबंधेन सत्तारूपप्रतियोग्यधिकरणावृत्तितया लक्षणाघटकस्य विशिष्टसत्ताभावस्य प्रतियो
गितावच्छेदकतायाः विशिष्टसत्तात्वे सत्त्वेनातिव्याप्तिविरहात् अत्र प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशव्यावृत्त्यसंगमेव । न च तत्र समवाय एव साध्यतावच्छेदकसंबंध इति वाच्यं तथा सति तत्सद्
धेतुत्वात् तल्लक्षणागमने तत्संभवेन प्रतियोगितावच्छेदकावच्छिन्नत्वविवक्षाव्यावृत्त्यसंगतेरिति । न द्सत् । समवायसंबंधावच्छिन्नप्रतियोगिताकविशिष्टसत्तात्वावच्छिन्नाभावस्य सत्ताघटवृ
त्तितिरिक्तस्याधिकरणे गुणादौ जातेर्वृत्तित्वेन समवायेन विशिष्टसत्तायाः साध्यत्वे जातिरूपहेतोर्व्यभिचारित्वसंभवादिति । अत्र प्रतियोग्यधिकरणता साध्यतावच्छेदकसंबंधेन वाच्या अन्यथा संयोगा
दिसंबंधेन धूमादिसाध्यके कालिकसंबंधेन धूमकालीनवह्न्यादिहेतावतिव्याप्तिः तत्र कालिकसंबंधेन हेत्वधिकरणे कालिकसंबंधेन धूमसत्तायाः आवश्यकतया संबंधसामान्येन यत्प्रतियोग्यधिकर राम॰ २२

र्णान्तरवृत्तित्वविशिष्टधूमाभावस्य हेत्वधिकरणेऽसत्त्वेन लक्षणाघटकतया धूमत्वेन यावद्विधाभावप्रतियोगितानवच्छेदकत्वात् । अत एव यत्किंचित्संबंधेन प्रतियोग्यधिकरणत्वं विवक्षणीयमि
त्यपि परास्तं । समवायसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तेः । अत्र वृत्तित्वं हेतौ विशेषणताविशेषणतावच्छिन्नं बोध्यं । अन्यथा सर्वेषामेवाभावानां संयोगसंबं
धेन कालिककालिकसंबंधेन वर्तमानतया प्रतियोग्यधिकरणावृत्त्यभावाप्रसिद्ध्या वह्निमान् पर्वतीयधूमादित्यादौ लक्षणागमनायेतेः । न च हेतुनियामकतादात्म्यादिना साध्यतायां साध्यतावच्छेद
कतादात्म्यादिनाप्रतियोग्यधिकरणाप्रसिद्ध्या तत्प्रतियोगिविधाभावाप्रसिद्धिरिति वाच्यं । साध्यतावच्छेदकसंबंधेन यः प्रतियोगिसंबंधी तद्वृत्तित्वस्यैव प्रतियोग्यसामानाधिकरण्यपदार्थत्वात् ।। यत्तु प्र
तियोग्यधिकरणत्वे प्रतियोगितावच्छेदकसंबंधेन वाच्यं न चैवं सति वह्निमान् धूमादित्यादावव्याप्तिः ४ । वह्नित्वस्य तत्प्रतियोगिसमवायसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावप्रतियोगितावच्छेदकत्वा
दिति वाच्यं अभावीयप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणादिति तन्न । उभयत्र संबंधविवक्षणे गौरवात् । वह्निमान् धूमादित्यादावव्याप्तिवारणायाभावे हेतुसामानाधिकरण्य
निवेशात्तत्रापि धूमसाध्यकधूमवद्वृत्त्यवच्छिन्नप्रतिवेद्याः । यत्तु द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादावव्याप्तिवारणाय हेतुतावच्छेदकावच्छिन्नपदं हेतावव्याप्तिवारणाय हेतौ हेतुतावच्छेदकत्वनिवेश इति ।

तन्नाप्यनस्तत्रं समवायेन विशिष्टसत्वस्य हेतुत्वेऽसद्धेतुत्वापत्तेः स्वमात्रवृत्तित्वविशिष्टद्रव्याधिकरणतासंबंधेनैव तस्य हेतुत्वमुपेयं तत्र चनाव्याप्तेरवकाशः द्रव्यत्वत्वस्य हेतुतावच्छेदकसंबंधेन हेत्वधि
करणीयद्रव्यत्वं तद्वृत्त्यभावप्रतियोगितानवच्छेदकत्वादिति। हेत्वधिकरणं हेतुतावच्छेदकसंबंधेन बोध्यं अन्यथा संबंधसामान्येन तद्विशेषणे संबंधसामान्येन गगनकालिकसंबंधेन धूमाधिकरणायं
ज्जलहृदादिकं तद्वृत्तिजलत्वादिविषयसंयोगसंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभावप्रतियोगितावच्छेदकतायावन्हित्वे सत्वात् वन्हिमान् धूमादित्यादावव्याप्त्यापत्तेः यत्किंचित्संबंधेन तद्विशेषणे तु
वन्ह्यवयवत्वे साध्ये संयोगेन वन्हिहेतावतिव्याप्तिः। समवायसंबंधात्मकयत्किंचित्संबंधेन हेत्वधिकरणे वन्ह्यवयवे वर्तमानस्याभावस्य प्रतियोगितानवच्छेदकतायावन्ह्यवयवत्वे सत्वात् स
मवायेन वन्ह्यधिकरणे तदवयवे वन्ह्यवयवत्वाभावस्यासत्वात् न तथैव सत्तितादात्म्येन सद्धेतावव्याप्तिः। हेतुतावच्छेदकसंबंधेन हेत्वधिकरणप्रसिद्धिरिति वाच्यं हेतुतावच्छेदकसंबंधावच्छिन्नहेतु
संबंधित्वस्यैव प्रकृते निवेशे क्षणानपूर्वक्षणावृत्तित्वविशिष्टवस्त्वाद्यभावेन वन्हिघटोभयाभावं वादायासंभववारणाय साध्येन व्याप्तिधाभावाप्रतियोगित्वमपहाय तत्र व्याप्तिधाभावप्रतियोगितानव
च्छेदकसाध्यतावच्छेदकावच्छिन्नत्वनिवेशः नन्वत्र किंपवच्छेदकत्वं न तु वदन्मूलत्वाप्तित्वं तत वन्हिमान् धूमादित्यादौ हेत्वधिकरणवृत्त्यभावप्रतियोगित्ववतिपदार्थेषु घटत्वादेरसत्वात् घटत्वादिमां सर्वेषां राम.
२३

मेव तादृशाभावप्रतियोगितानवच्छिन्नवृत्तितया तथाविधावच्छेदकाप्रसिद्ध्याऽसंभवापत्तेः अत एव ज्ञाननिरिक्तवृत्तित्वं न तद्वृत्तित्वावच्छिन्नाभावमादाय सर्वेषामेव तथात्वे धर्मप्रतियोगिता अयं तयात्तदभावाप्र
सिद्ध्या वह्निमान् धूमादित्यादावसंभवापत्तेः न च हेत्वधिकरणावृत्तित्वं किंचिदभावप्रतियोगितायाः अनतिरिक्तवृत्तित्वं न हि धूमवान्वह्नेरित्यादौ अतिव्याप्त्यापत्तेः पदत्वतियतादृशाप्रतियोगिताव
च्छेदकतातयाधूमत्वेऽभावात् तन्न च हेत्वधिकरणावृत्तितदभावप्रतियोगितायाः अनतिरिक्तवृत्तित्वे यद्यगमनवेदकत्वरूपलक्षणोपि निवेशान्नोक्तदोषः न तथाविधरूपांतः पातितो धूमत्वभेद स्वधूमत्वे
असत्वात् इति वाच्यं वह्निमान् धूमादित्यादावसंभवापत्तेः वह्निसाध्यकेपि तथाविधवह्निघटाभावभावप्रतियोगिताभाववत्पवृत्तितयानिरूक्तप्रतियोगितावच्छेदकतानोक्तत्वेनात्र तथाविधभेदह
यासत्वात् न च हेत्वधिकरणावृत्तितत्तदभावीयप्रतियोगितायाः अनूनानतिरिक्तवृत्तितयद्यज्ञनभेदकरूपलक्षणोनिवेशान्नोक्तदोषावकाश इति वाच्यं न पापितालानितारोमियस्थाभावच्छिन्नाभावमा
दाय असंभवापत्तेः दुर्वारत्वात् वह्नित्वादेस्तादृशाभावीयप्रतियोगितायाः अनूनानतिरिक्तवृत्तितया निरूक्तावच्छेदकत्वात्तत्तयात्त्र न तथाविधभेदकरूपासत्वात् इति चेन्मैवं स्वरूपसंबंधरूपावच्छेदकत
स्यात्र निवेशात् न चैवं धूमेयधूमवान्वह्नेरित्यादावतिव्याप्तिः अमेयधूमत्वस्य मतियतधूमत्वाये स्पयागुरुतया धूमाभावप्रतियोगितानवच्छेदकतया हेत्वधिकरणावृत्त्यभावप्रतियोगितानवच्छेदक

मु.टी.
२४
२५

त्वादित्यिवाच्यं गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वांगीकारे क्षतिविरहात्· अभावप्रतियोगितावच्छेदकत्वबुद्धिं प्रति गौरवज्ञानस्य प्रतिबंधकत्वे मानाभावादिति सारं प्रकारांतरं तु हेत्वाधितावनुसं
धेयं॥ ॥व्याप्तेर्हेतुनिष्ठत्वार्थमाह॥ ॥साध्यसामानाधिकरण्यमिति॥ ॥नन्वेवं साध्यतावच्छेदकसंबंधेन यः साध्यसंबंधी तन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नसंबंधित्वं· अतः संयोगादिसंबं
धेन वन्हेः साध्यतायां संयोगादिसंबंधेन धूमादिहेतौ कालिकसंबंधघटिततथाविधवन्हिसामानाधिकरण्येन व्याप्तिव्यवहारप्रसंगः नवातादात्म्यादिसंबंधस्याधिकरणत्वानिरूपिकत्वेपि तादा
त्म्यसंबंधेन हेतुतायां साध्यतायां वाव्याप्त्यनुपपत्तिरिति· नचैवमपि रासभादिति घटतथाविधवन्हिसामानाधिकरण्ये व्याप्तिव्यवहारप्रसंगो दुर्वार इति वाच्यं· यद्धेतुतावच्छेदकावच्छिन्ननिष्ठा तत्सा
ध्यतावच्छेदकासमानाधिकरणाभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यविशिष्टतद्धेतुतावच्छेदकं तद्धेतुतावच्छेदकावच्छिन्ननिष्ठा तत्साध्यतावच्छेदकाव
च्छिन्ननिरूपिता व्याप्तिरिति तल्लक्षणकरणेनानुपपत्त्यभावात्· अतएवैवं हि सा व्याप्तिरिति ग्रंथोपि संगच्छते· अन्यथा हेतुनिष्ठसाध्यसामानाधिकरण्यस्य हेतुभेदेन भिन्नतया व्याप्तेरैक्यानुप
पत्त्या तादृशग्रंथानुपपत्तेः॥ अथैवमपि द्रव्यत्वादिमान् द्रव्यादिसंयोगादित्यादौ नानाव्यक्तिसाध्यतावच्छेदकस्थले व्याप्तिस्तत्र न तद्रूपसाध्यतावच्छेदके हेत्वधिकरणावृत्तितत्तद्विशिष्टाभावप्रति राम.
२४

योगीतावछेदकत्वाद्धेत्वधिकरणे वाच्यत्वाभावेन तत्संदंडविशिष्टाभावसत्वाद्व्याप्तिर्घटेत्वतः तत्तत्स्वाश्रयसंयोगीत्वरूपपरंपरासंबंधेन दंडत्वस्यैव साध्यतावछेदकत्वांगीकारेणानुपपत्त्यभावात् न चैवं स
ति दंडवान्नित्यैवानुमितिः स्यात्तत्र दंडिमानित्याकारिकेतिवाच्यं तत्र दंडहेत्वधिकरणावृत्त्यभावप्रतियोगीतानवछेदकत्वभ्रमोयाकत्वात् क्तितादृशभ्रमदशायामेव दंडिमानित्याकारिकानुमितिरित्युपगमादि
त्यलमतिविस्तरेण ॥ अत्र लक्षणे साध्ये हेत्वधिकरणावृत्त्यभावाप्रतियोगीत्वमपहाय साध्यतावछेदके हेत्वधिकरणावृत्त्यभावप्रतियोगीतानवछेदकत्वानुधावनस्य फलमाह ॥ अत्यनिषक्ते
रिति ॥ ॥ महानसादिनिष्ठवह्नेरित्यर्थः ॥ तत्प्रतियोगीताश्रमवत्पर्वतादिवृत्तित्वात्संताभावप्रतियोगीता। न च वह्नित्वेनावच्छिद्यते ‹ न वह्नित्वावच्छिन्ना अत्र हेतुमाह ॥ धूमवति वह्निर्नास्तीत्यादि ॥ ॥
तथा च साध्ये हेत्वधिकरणावृत्त्यभावाप्रतियोगीत्वं निवेशयत्यामित्यत्र लक्षणाकरणे पर्वतो वह्निमान्धूमादित्यादावव्याप्तिरितितनुपेक्ष्य साध्यतावछेदके तत्पावित्वप्रतियोगीतानवछेदकत्वं नि
वेशयत्याभिलक्षणांकृतं। तत्र च नाव्याप्तिः। धूमवति वह्निर्नास्तीत्यप्रतीतेर्वह्नित्वावच्छिन्नप्रतियोगीताकाभावस्य धूमवत्पर्वताद्यवसत्वाद्व्याप्तिर्निर्माकः ॥ ननु तथापि वह्निमान्धूमादित्यादौ निरुक्तलक्षण
गमनासंभवः। सामान्यधर्मावच्छिन्नप्रतियोगीताकातिरिक्ताभावेमानाभावेन विशेषाभावस्यैव सामान्यधर्मावच्छिन्नप्रतियोगीताकत्वयान तत्प्रतियोग्यधिकरणावृत्तिहेत्वधिकरणावृत्त्यभावाप्रसिद्धेः।

मु॰टी॰ २५
25

घटाद्यभावानां द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकतया पर्वतादौ तेषामपि स्वप्रतियोगितावच्छेदकीभूतद्रव्यत्वावच्छिन्नाधिकरणत्वमस्तीत्यत आह॥ ॥सामान्यधर्मावच्छिन्नप्रतियोगिताका
भाव इति॥ पृथक्त्वादिदोषवद्धर्मावच्छिन्नप्रतियोगिताकाभावाद्भिन्नः। अत्र युक्तिमाह॥ ॥अन्यथेति॥ ॥सामान्यधर्मावच्छिन्नप्रतियोगिताकातिरिक्ताभावानंगीकारे इत्यर्थः सकलरूपा
भावे· पार्थिवादित्रितयरूपाभावे· प्रसिद्धरूपवद्द्रव्यत्वे चावगते वायौ निर्णीते· वायुः पार्थिवरूपाभाववान् जलीयरूपाभाववान् तैजसरूपाभाववानिति निश्चयकाले वायुः पार्थिवरूपवद्भिन्नः ज
लीयरूपवद्भिन्नः तैजसरूपवद्भिन्नः इति निर्णयकाले वेति यावत्· वायो रूपं नवेति· वायुर्विशेष्यकरूपतत्संतताभावकोटिकः इत्यर्थः ननु रूपविशेष्यकवायुप्रकारकत्वेन तदभावकोटिकः इत्यर्थः तथा स
द्वायुः पार्थिवादित्रितयरूपाभाववानिति निर्णयस्य समानाकारकत्वेन तथाविधसंशयप्रतिबंधकत्वेन तदा संशयानुत्पादेनापादनस्यासंगत्यापत्तेरिति॥ वायुरूपवान्नवेति॥ वायु
विशेष्यकरूपवद्भेदकोटिक इत्यर्थः विशेषाभावकूटस्य निश्चितत्वात्। ननु रूपत्वावच्छिन्नप्रतियोगिताकपार्थिवादित्रितयरूपाभावकूटस्य निश्चयविषयत्वात्। तथा च विशेषाभावकूटस्य सा राम॰ २५
मान्यधर्मावच्छिन्नप्रतियोगिताकसांगीकारे विशेषाभावकूटनिश्चयस्यैव सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावनिश्चयत्वेन तथाविधरूपाभावकूटविनिश्चयकाले रूपत्वावच्छिन्नप्रतियोगिता

काभावनिष्ठप्रकारतया विधिसंशयप्रतिबंधकसत्त्वात्तथाविधसंशयो न स्यादिति भावः अत्रेदमवधेयं। विशिष्टवुद्धिं प्रति वस्तुगत्या सामान्यधर्मावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञान
त्वेन न प्रतिबंधकत्वं प्रमेयत्वादिना सामान्याभाववत्तावुद्धिकाले विशिष्टवुद्ध्यनुत्पत्त्यापत्तेः। अपि तु सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नसामान्यधर्मावच्छिन्नप्रकारता
निरूपिताभावत्वावच्छिन्नविषयताशालिज्ञानत्वेन तथा च वायौ रूपत्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नरूपत्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविषयताशालिज्ञानका
लेन तथाविधसंशयाभाव आपाद्यते। उक्ततत्तद्रूपत्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नतत्तद्रूपत्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविषयताशालिनिश्चयकाले वा तत्रा
घेरस्यापत्तिः। अतिरिक्तसामान्याभावांगीकर्त्रापि तरां संशयापानंगीकारात्। द्वितीये तु विशिष्टवुद्धिं प्रति सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वावगाह्यभाववत्तावगाहिज्ञानस्यैव प्रतिबंधक
त्वात्तदा न तथाविधप्रतिबंधकासत्त्वेनोपदर्शितसंशयाभावापादनमशक्यमेवेत्यतिरिक्तसामान्याभावांगीकारे मूलोक्तयुक्तिः शिथिलैवेत्यत्र युक्त्यंतरमुच्यते तथाहि विशेषाभावे सामा
न्यधर्मावच्छिन्नप्रतियोगिताकत्वांगीकारे वह्निमति पर्वते तादृशवह्निर्नास्तीति प्रतीत्यापत्तिः वह्नित्वावच्छिन्नप्रतियोगिताकमहानसीयवह्न्यभावस्य पर्वते सत्त्वात्। ननु विशेषाभावकू

मु.टी.
२६
26

देसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तिः अयं च विशिष्टसत्तायाः सत्तानतिरिक्तत्वेपि तदधिकरणतायाः अतिरिक्तत्वे तदनतिरिक्तसामान्याभावानभ्युपगमेपि सामा
न्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टाभावाधिकरणताऽतिरिक्ताऽभ्युपेयते साधविशेषाभावकूटाधिकरणतायां च निष्टतिरिक्तताऽपत्तिरिति चेत् न । यत आधेयतासम्बन्धेन तद्ध
र्मिमत्त्वस्यैव परस्परयावृत्ताऽभ्युपेयते तस्य हेतुतया न तत्र रूपाभावकूटस्य तासंभवे तेनांततः तत्तद्रूपाभावभेदत्तानासंभवात् तद्येन तासौ तीति मतस्यानुपपत्तिः। द्वितीये सामान्यधर्मावच्छि
न्नप्रतियोगिताकत्वविशिष्टाभावाधिकरणतायाः अतिरिक्तत्वाभ्युपगमेपि घटपटाद्यभावानामपि भेदविलोपापत्तिः। तत्रापि घटत्वावच्छिन्नप्रतियोगिताकाभावे पटत्वावच्छिन्नप्र
तियोगिताकत्वमभ्युपगम्यते यावद्धर्मप्रतियोगिताकत्वविशिष्टाधिकरणतायाः अतिरिक्तत्वमभ्युपेयं च सर्वदोषपरिहारसंभवादिति। वस्तुतस्तु अतिरिक्तसामान्याभावानंगीकारे
वह्निर्नास्तीत्यादिप्रतीतेरनंततद्वह्नित्वावच्छिन्नप्रतियोगिताकाभावविषयत्वकल्पने गुरुत्वात् वह्नित्वावच्छिन्नप्रतियोगितालाघवावच्छिन्नाद्यभावादिहेतुतायाः अनंततत्तदभावहेतुकल्पने च मह
गौरवं प्रसंगात् अतिरिक्तसामान्याभावोऽवश्यमभ्युपेय इत्यादि विकृतं रगृहनीयं। वह्निमत्त्वव्याप्यप्रमेयाधिकरणवह्निधर्मयोरपि व्याप्तिरिति मतेन लक्षणमुक्तासमानाधिकरणवह्निधूम राम०
२६

योरेवव्याप्तिरितिमतेलक्षणमाह॥ यद्वेत्यादि॥ अत्रप्रतियोग्यनधिकरणीभूतयद्धेत्वधिकरणवृत्त्यभावाप्रतियोगित्वंसाध्यंतत्सामानाधिकरण्यंतद्धेतुनिष्ठंतत्साध्यनिरूपितंव्याप्तिरिति
लक्षणवाक्यार्थोविधेयः॥ अत्रद्रव्यत्वान्पृथिवीत्वादित्यादावव्याप्तिपरिहारस्तत्रैवमन्तव्यः॥ अन्यत्सर्वंपूर्ववदेवसेयं॥ उक्तरीतिमतद्वये अत्यन्ताभावघटितलक्षणद्वयमुक्त्वा अन्योन्याभावघटि
तलक्षणद्वयमाह॥ ॥यत्समानाधिकरणेत्यादि॥ अत्रप्रथमलक्षणेपरंहेतुतावच्छेदकावच्छिन्नहेतुपरं॥ प्रतियोगीयद्धेत्वभवतीत्यस्यप्रतियोगितायांसाध्यतावच्छेदकावच्छिन्नत्वप्रभवती
त्यर्थः॥ तथाचयद्धेतुतावच्छेदकावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितासाध्यतावच्छेदकावच्छिन्ननिष्ठातत्साध्यतावच्छेदकावच्छिन्ननिरूपिताव्याप्तिरितिप्रथमलक्षणवाक्यार्थः॥ हेतु
तावच्छेदकावच्छिन्नयद्धेतुसमानाधिकरणान्योन्याभावाप्रतियोगितासाध्यवत्त्वंसाध्यवत्(सा)ध्यवत्त्वंतद्धेतुनिष्ठंतत्साध्यनिरूपितंव्याप्तिरितिद्वितीयलक्षणवाक्यार्थोबोध्यः॥ ननुअत्यन्ता
भावघटितचरमलक्षणायक्लेशेऽन्योन्याभावघटितचरमलक्षणायक्लेशवदधिकरणावह्निधूमयोर्व्याप्त्यव्यवहाराभावापत्तिरित्यत्रेष्टापत्तिमाह॥ ॥अन्यद्वेत्यादि॥ ॥असंत्ताभावघटितचरमलक्ष
णायक्लेशेऽन्योन्याभावघटितचरमलक्षणायक्लेशेत्यादिः अप्रत्वेनवह्निरित्यस्यमहानसादिवृत्तिवह्निरित्यर्थः॥ अन्यद्वेतियुक्तमेतत्स्यपर्वतादिवृत्तिवह्निमेत्यर्थः॥ ननुअभ्रमस्यतत्त्वमनिष्टानत्वं॥ हेनात

मु. टी.
२८
27

तद्वह्निनिरूपितात्रव्याप्तिरिति स्यादनुषंगः। तथा चात्र तत्संभाभावघटितत्वरमलक्षणापत्तेः अन्योन्याभावघटितत्वरमलक्षणापत्तेश्च व्यधिकरणवह्निधूमयोर्व्याप्तिव्यवहारो नास्त्येव। अ
पि तु समानाधिकरणवह्निधूमयोरेव तथा व्यवहार इति नोक्तानुपपत्तिरिति भावः। ननु त्वन्मताभावघटितत्वरमलक्षणापत्तेः अन्योन्याभावघटितत्वरमलक्षणापत्तेश्च धूमसामान्ये वह्निसा
मान्यव्याप्यमिति व्यवहारो नोपपद्यते तादृशव्यधिकरणवह्निनिरूपितव्यधिकरणधूमनिष्ठव्याप्त्यभावादित्यभिप्रायेणाशंकते। ।। न चैवमिति।। ।। एवं समानाधिकरणवह्निधूमयोरेव
व्याप्त्यंगीकारे धूममात्रे धूमसामान्ये न व्याप्तिः। न वह्निसामान्यनिरूपिता व्याप्तिः। तथा च तादृशव्यवहारोऽनुपपन्न इति भावः। सर्वधूमव्यक्तेः धूमत्वरूपेण तत्तद्धूमव्यक्तीनां तथात्वेन वह्नित्वरूपेण
तत्तद्वह्निसामानाधिकरण्येन धूममात्रस्य धूमसामान्यस्य व्याप्यत्वात् वह्निसामान्यव्याप्यत्वात् तथा च धूमसामान्यं वह्निसामान्यव्याप्यमिति व्यवहारो न व्यधिकरणधूमनिष्ठव्यधिकरणाव
ह्निनिरूपितव्याप्तिविषयकः अपि तु धूमत्वावच्छिन्नतत्तद्धूमनिष्ठतत्तद्धूमसमानाधिकरणवह्नित्वावच्छिन्नतत्तद्वह्निनिरूपितव्याप्तिविषयक इति नोक्तानुपपत्तिरिति भावः। ननु तथापि तत्तद्धूमे तत्त
मवान्वये रासभादेर्युगपदुपस्थितिविषयाधिकरणतत्तत्सरिमाणसाध्यकतत्तत्सरिमाणहेतोर्व्याप्तिर्न स्यादित्यत आह॥ धूमसंबंधादिति॥ ।। व्याप्तिरेवेत्यस्य कालिकीत्यादिः। हि। अस्य व्यापुणप राम॰ २७

दुत्पन्नत्वेन सत्त्वाभिधानमसंगतं स्यादिति। ननु प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावघटितलक्षणे संयोगी सत्त्वादित्यादावव्याप्तिः संयोगाभावस्य स्वप्रतियोगिसं
योगाधिकरणवृत्तितया लक्षणाघटकतया संयोगत्वस्य प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणवृत्तित्वविशिष्ट(स्व)भावप्रतियोगितानवच्छेदकत्वादित्यत आह॥ कर्मत्वेति॥ क
र्मत्वावच्छेदेनेत्यर्थः। प्रतियोग्यसमानाधिकरणः। प्रतियोग्यधिकरणावृत्तित्वविशिष्टः। संयोगाभावे कर्मादौ न संयोगसामानाधिकरण्यमिति प्रतीतेरिति शेषः। तथा च कर्मावच्छेदेन संयोगा
भावे संयोगाधिकरणावृत्तित्वाभावविषयकप्रतीतेः संयोगसामानाधिकरण्यस्याप्यव्याप्यवृत्तितया लक्षणाघटकस्य संयोगाभावस्य प्रतियोगितावच्छेदकत्वात् संयोगत्वस्येति तत्र नाति
व्याप्तिरिति भावः। ननु संयोगाभावे कर्मादौ न संयोगसामानाधिकरण्यमिति प्रतीतेः संयोगाभावे कर्मावच्छेदेन संयोगसामानाधिकरण्याभावो न विषयः संयोगाभावः संयोगसामानाधि
करण्याभाववानिति बाधकप्रतीतिसत्त्वात् अपि तु कर्मणि संयोगाभावनिष्ठसंयोगसामानाधिकरण्यावच्छेदकत्वाभाव एव तादृशप्रतीतेर्विषयः। तथा च संयोगाभावस्य संयोगाधिकरणावृत्ति
त्वाभावे मानाभावेनोपदर्शितलक्षणाघटकतया संयोगी सत्त्वादित्यादावव्याप्तिर्दुर्वारेत्यत आह॥ यद्वेत्यादि॥ ॥प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्रतियोगिवैयधिकरण्यविशे

सर्गवैशिष्ट्यं अत्यन्ताभावविशेषणत्वं । व्याप्तिलक्षणप्रविष्टहेतुसमानाधिकरणात्यन्ताभावविशेषणत्वं । नन्वेवं सति कथमुपदर्शितनिरुक्तेऽतिव्याप्तिवारणमित्यत आह । कर्मणि चैवेति ।। संयोगाभा
वस्य प्रतियोगिवैयधिकरण्यं इत्यत्राक्षिप्तेन यावत्संयोगाभाववृत्ति प्रतियोगिवैयधिकरण्यं कर्मणि चैव ।। निरूपकतासंबन्धेन कर्मणि द्रव्यत्वे वेत्यर्थः । एवं च निरूपकताघटितसामानाधिकरण्यप
संबन्धेन प्रतियोगिवैयधिकरण्यविशिष्टो यः संयोगाभावस्तदधिकरणतायाः कर्मण्यसत्वेन संयोगिसत्वादित्याशयः संयोगाभावस्यापि लक्षणघटकतया नातिव्याप्तिरिति भावः । नन्वत्र
प्रतियोगिवैयधिकरण्यं च प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणवृत्तित्वं स्वप्रतियोगितावच्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यनधिकरणत्वं वा स्वीययत्किंचित्प्रतियोगितावच्छेदका
वच्छिन्नानधिकरणवृत्तित्वं वा स्वीययावत्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं वा नाद्यः द्रव्यत्वाभाववान् गुणत्वादित्यादौ सर्वेषामेव हेतुसमानाधिकरणाभावानां पूर्वक्षणवृत्तित्व
विशिष्टस्वाभावस्य प्रतियोगिसमानाधिकरणत्वात् प्रतियोग्यधिकरणाभावाप्रसिद्ध्याऽव्याप्त्यापत्तेः न द्वितीयः कपिसंयोग्येतद्वृक्षत्वादित्यादावव्याप्तेः तत्र स्वप्रतियोगितावच्छेदकक
पिसंयोगत्वावच्छिन्नयत्किंचिद्व्यक्त्यात्मकोऽपि घटादिवृत्तिः कपिसंयोगस्तदनधिकरणवृत्तित्वविशिष्टसंयोगाभावस्य प्रसिद्धेः सत्वेन कपिसंयोगस्याभावस्यापि लक्षणघटकत्वात् न तृतीयः कपिसं राम॰
२८

योगाभाववानात्मत्वादित्यादौ हेतुसमानाधिकरणरूपसंयोगात्मकसाध्याभावस्य गुणात्मकस्य यत्किंचित्प्रतियोगितावच्छेदकगुणत्वसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वविशिष्ट
त्वात् । लक्षणघटकतयाऽव्याप्तेः नचतुर्थः सर्वत्र सद्धेतौ स्वीययावत्प्रतियोगितावच्छेदकावच्छिन्नानः पातिपूर्वलक्षणवृत्तित्वविशिष्टस्वाभाववत्वन्तत्त्वद्वृत्तित्वाविशिष्टस्वाभावत्वावच्छिन्न
सामान्यानधिकरणस्य प्रसिद्ध्याप्रतियोगिव्यधिकरणाभावप्रसिद्ध्यभावेनासंभवापत्तेरिति चेन्न । मैवं । यादृशप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणवृत्तित्वविशिष्टहेत्वधि
करणवृत्त्यभावीयतादृशप्रतियोगितानवच्छेदकत्वस्य प्रतियोगिवैयधिकरण्यपरिष्कारव्यानवच्छेदकांशे । तेन विवक्षणात् भावानामेकस्यापि प्रतियोगिभेदेन प्रतियोगितायाभेदात् पूर्वोक्तानुप
पत्तेरभावात् । नचैवं यादृशप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणहेत्वधिकरणतादृशप्रतियोगितानवच्छेदकत्वमेवलक्षणघटकमस्तु लाघवात् किमभावादिनिवेशनेनेति चेन्न । भ
वन्मते यद्यपि तथा संनिवेशे न वैयर्थ्यमिति प्रवादोऽनस्यात्तथापि अनतिप्रयोजनकसंभवादिविशेषणमिति चेत् तर्हि न विशेष्यतएव व्याप्यवृत्तिसाध्यके अभावादिकं व्याप्यवृत्तिसाध्यकेनुप्रति
योगिवैयधिकरण्यपतिवेशप्रयोजनाभावेन तथा निष्कर्षसंभवेनाभावादिनिवेशनमावश्यकमिस्पवेहिः वस्तुतस्तु स्वावच्छेदकावच्छिन्नाधिकरणानुयोगिकत्वस्य निरूपकव्याप्यवृत्तिसभा

मु. टी.
२९
29

वन्निरूपितत्वोभयसंबंधेनप्रतियोगिताविशिष्टभिन्नायाहेत्वधिकरणनिष्ठाधिकरणतानिरूपकाभावेत्तिप्रतियोगित्वअधिकरणहेतुसमानाधिकरणाभावोनत्वन्निरूपकत्वैर्गानाव्याप्यवृत्तिसा
ध्यकेपिव्याप्तिलक्षणेअभावीयाग्रानवैयर्थ्यत्रींकेति। अत्रप्रतियोग्यधिकरणत्वंसाध्यतावच्छेदकसंबंधेनबोध्यं। किंअतोनपूर्वोपदर्शितानुपपत्तिरितिध्येयं। नन्वेवंसतिमहाकालोघट
वान्महाकालत्वपरिमाणादिमान्दैकालिकविशेषणताविशेषसंबंधेनसाध्यतायाअव्याप्तिः।। मत्राहृत्तिगगनादेरभावस्यप्रतियोग्यधिकरणाप्रसिद्ध्याहृत्तिमत्प्रतियोगिताकाभा
वस्यचकालिकसंबंधेनप्रतियोग्यधिकरणात्वस्यहेत्वधिकरणोमहाकालेसत्त्वेनपादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणंहेत्वधिकरणंनादृशप्रतियोगितायाअप्रसिद्धेरितिचे
त्नन। महाकालान्यत्वविशिष्टघटाभावीयप्रतियोगितायाएवतादृश्याः प्रसिद्धत्वात्। विशिष्टाधिकरणतायाः अप्रसिद्धत्वेनमहाकालान्यत्वविशिष्टघटाधिकरणतायामहाकाले सत्त्वादि
तिबोध्यं। यत्तुसाध्यसाधनभेदेनलक्षणस्यभिन्नतयाविशिष्टाधिकरणाप्रसिद्धिःसाध्यतापामेवलक्षणेप्रतियोगितावच्छेदकावच्छिन्नत्वंप्रतियोग्यंशेनिवेशनपतेनत्वविशिष्टाव्याप्यवृत्तिसाध्यकेपि
प्रयोजनाभावात्तत्याच्चमहाकालान्यत्वविशिष्टघटाभावप्रतियोगिनोघटस्यकालिकसंबंधेनमहाकालेसत्त्वान्नूकथंतादृशाभावीयप्रतियोगितात्याविधाप्रसिद्धेरिति। तन्न। कालोघटवान्का राम. २९

लपरिमाणत्वादिसाध्यकव्याप्तिवारणाय स्वरूपार्थान्तराभावात् एतादृशविशिष्टव्याप्यवृत्तिसाध्यकेऽपि प्रतियोग्यवैयधिकरण्यप्रतियोगितावच्छेदकावच्छिन्नत्वं निवेश्यैव व्याप्तिलक्षणप्रणयनात् । अन्यो
न्याभावघटितव्याप्तिलक्षणे कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्यवृत्तिसाध्यके अव्याप्तिमाशंकते। नचेति॥ ॥अन्योन्याभावस्य कपिसंयोगादिमदन्योन्याभावस्य॥ ॥अभेदस्येत्या
दि। ॥वृक्षः कपिसंयोगीभेदाभाववानित्यतिरिक्त तथाविधभेदाभावविषयकाबाधितप्रत्ययसत्त्वादित्यर्थः। न चात्र तादृशबाधकप्रतीतिबलात् अग्रे वृक्षः कपिसंयोगी मूले नेति प्रतीतेः संयो
गाभावविषयकत्वावश्यकत्वे संयोगवदन्योन्याभावस्याव्याप्यवृत्तितायां मानाभाव इति नान्योन्याभावघटितलक्षणस्य कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरिति भावः। इदमापाततः भे
दस्याव्याप्यवृत्तितामतेन तथाविधभेदाभावस्याव्याप्यवृत्तित्वमिति नोक्तप्रतीतिविरोधिका तथा च मूले वृक्षः कपिसंयोगी नेति प्रतीतेः संयोगाभावविषयकत्वेन कल्पने बाधकसत्त्वे एवम्प्रतीतेर्विशे
षणाभावविषयकत्वनियमात् एवं च तादृशप्रतीतेरन्यथानुपपत्त्या संयोगवद्भेदविषयकत्वावश्यकत्वेनान्योन्याभावस्याव्याप्यवृत्तित्वमक्षतमेवेति ननु अन्योन्याभावघटितचरमलक्षणाय
हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणत्वाद्यात्मा तथाविधान्योन्याभावाप्रतियोगिसाध्यकत्वमित्यत्र धाविधान्योन्याभावाप्रतियोगिसाध्यकत्वं वह्नित्वमिति पर्यवसानात् संबन्धमात्रस्य नियमसाधकतापि न व्याप्यत्वमिति मतेन तल्लक्षणस्याव्याप्तिय

मु॰ दी॰ टितत्वाद्व्याप्याश्रयप्रसंगस्यत आह।। ॥व्याप्यव्यापकभावेत्यादि॥ व्याप्यव्यापकभावाज्ञानेपि। व्याप्यस्य व्यापकनिरूपितो भावः साध्यनिरूपितसाधननिष्ठव्याप्यत्वमिति यावत् तज्ज्ञानं विनापि संबंध
३० त्वेनैव भानस्य। संयोगत्वादिनैव व्याप्तिबुद्धिविषयस्य। न थात्वेनाज्ञायमानस्य। व्याप्तित्वेनाज्ञायमानस्य संयोगादेः। वस्तुसतः। वस्तुनि साध्यवति विद्यमानस्य। षष्ठ्यर्थत्वे। संबंधित्वे। तथाचा
त्रस्वनिष्ठसाध्यनिरूपितव्याप्यत्वरूपसंबंधो न षष्ठ्यर्थः। अपितु संयोगत्वादिना भास्याश्रय इति भावः।। ॥नचैवमिति॥ एवं।। अननुगतस्वपदार्थघटितत्वे। अननुगमः।। साध्यसाधनभेदे
30 नलक्षणस्य विभिन्नता।। ॥दोषापेति॥ एकसाध्यसाधनघटितलक्षणे अन्यसाध्यकसाधने अव्याप्तेरिति भावः। कस्य का व्याप्तिरिति नोति। न तत्साध्यकतत्साधनभेदेन भिन्नव्याप्तिरूपलक्षणा
स्य लक्ष्यत्वात् (तथापि) मतिभेदेनाप्यर्थः अननुगतस्यैव। तत्तत्साध्यकतत्तद्धेतोरेव।। लक्ष्यत्वात्। साध्यसाधनभेदेन विभिन्नव्याप्तिरूपलक्षणस्य लक्ष्यत्वात्। तथा च लक्षणानुगमे लक्ष्यस्य
प्यननुगतत्वात्तथाव्याप्तिर्दोषावकाश इति भावः। अत्यंताभावान्योन्याभावघटितलक्षणे असंभवरूपदोषमाशंकते।। ॥अथेत्यादि॥ व्यासज्यवृत्तिप्रतियोगिके। व्यासज्यवृत्तिधर्मावच्छिन्नप्रति
योगिताके। कथमेतल्लक्षणे। कथमत्यंताभावान्योन्याभावलक्षणे। असंभवरूपदोषरहिते इति शेषः। तथा च व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वाभावः रामः॰
३०

प्रत्येकधर्मद्वयेऽपि सत्त्वाद्यन्यत्वाद्यवच्छिन्नत्वादेरपि तथाविधाभावप्रतियोगितावच्छेदकत्वात्तथा च लक्षणानामसंभव इत्यस्तां । एवं तथाविधाभावप्रतियोगिताया उभयत्र सत्त्वेन प्रत्येकमपि सत्त्वादिनरूप
लक्षणानामप्यसंभव इत्येतदनुपपन्नमिति भावः । वह्निहृदोभयत्वस्य त्वाद्यप्रतीतौ प्रत्येकाभावविषयत्वेनोपपत्तौ व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावे मानाभाव इत्यभिप्रायेणाह । नाहृदाभ
वेत्यादि । व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावे मानाभावादित्यर्थः । तथा च व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या नीयहृदादिनिरीत्या उक्तलक्षणासंभव इति भावः । ननु
व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावानङ्गीकारे घटौ न स्तः पटौ न स्त इत्यादि प्रत्येकाभावविषयकप्रतीतितो घटपटौ न स्त इति प्रतीतेरवैलक्षण्यप्रसङ्गः । न च घटपटत्वावच्छिन्नसमानाधिक
रणधर्मावच्छिन्नप्रतियोगिताकत्वविषयत्वेन वैलक्षण्यप्रतीतेर्घटत्वपटत्वादिप्रत्येकधर्मावच्छिन्नप्रतियोगिताकत्वविषयकघटौ नास्ति पटौ नास्तीति प्रतीतितो वैलक्षण्योपपत्तिरिति वाच्यं । पटे
चिद्धृदे घटपटयोर्भाववति घटपटौ न स्त इति प्रतीत्यापत्तेः । तद्धटे विजातिघटत्वस्यापि घटपटयटत्वावच्छिन्नसमानाधिकरणत्वेन तादृशप्रतीत्यवच्छिन्नप्रतियोगिताकाभावस्य तत्र स
त्त्वात् । न च घटत्वपटत्वान्यतरधर्मावच्छिन्नप्रतियोगिताकाभाव एव घटपटौ न स्त इति । प्रतीतिविषयो वाच्य इति न तथा तत्रापि तथाविधप्रत्येकाभावविषयकप्रतीतितो वैलक्षण्यानुपपत्तिरिति वाच्यं ।

मु० टी० ३१

31

तुल्यमुक्ताघटेन तत्तद्व्यतिप्रतीतेरपि नद्दृष्टत्वेन द्वित्वान्यतरधर्मावच्छिन्नप्रतियोगिताकाभावमात्रविषयकत्वेन तद्दृष्टम्भूते घटद्वयपवृत्तिघटौ न स्तः इति प्रतीत्यापत्तेः। तत्र तद्दृष्टत्वद्वयत्वान्यावि
धान्यतरधर्मावच्छिन्नप्रतियोगिताकाभावसत्त्वात्। एवं घटश्यामो घटश्यामश्च भूतलासे घटपटौ भयं नास्तीति प्रतीतेस्तत्त्वाविधनानाभावविषयकस्वकल्पने गौरवप्रसंगेनातिरिक्तव्यासज्यवृ
त्तिधर्मावच्छिन्नप्रतियोगिताकाभावविषयकत्वकल्पनस्यावश्यकत्वादिति। व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावस्वीकारस्यावश्यकत्वमुपदर्शितरीत्यापूर्वोक्तलक्षणेसंभवो दुष्परि
हर इत्यत आह। अभ्युपगमेवेति। व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावस्वीकारे चेत्यर्थः। तदुभयमिति। द्वित्वेनाहृत्यप्रत्येकधर्मद्वयेनेत्यर्थः। प्रतियोगी। व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियो
गिताकाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं। वह्निवह्निमत्त्वौ। वह्नित्ववह्निमत्त्वेनाहृत्याभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणे इति विभक्तिविपरिणामेनान्वयः। तथा च हेत्वधि
करणावृत्त्यन्ताभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नं यत्साध्यतावच्छेदकं तत्त्वावच्छिन्नसमानाधिकरणं तु तावच्छेदकं तद्वच्छिन्नसाध्यसामानाधिकरण्यं वा व्याप्तिरिति अस
न्ताभावघटितचरमलक्षणद्वयवाक्यार्थः। तथा च विधाभ्यामाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणाभिन्नं यत्साध्यतावच्छेदकावच्छिन्नत्वेन तत्साध्यतावच्छेदकावच्छिन्नसमानाधिकरणं ह राम० ३१

तिहेतुतावच्छेदकं तत्साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं वा व्याप्तिरित्यन्योन्याभावघटितलक्षणादुपनिष्कर्षो बोध्यः। तत्र च नतत्प्याविधोभयाभावमादायासंभवः। वह्नित्वादिना या
विधायां तेनाभावाद्यप्रतियोगितावच्छेदकतायाप्यधिकरणत्वाभावात्। यद्यपि प्रकृते तथाविधाभावे प्रतियोगितावच्छेदकं तादृशधर्मत्रयं न तु प्रत्येकमिति प्रत्येकं नैतिसात्त्विकः स्वरूपसंबंधविशे
षइति भावः। एतेन विशिष्टस्य विशेष्यादनतिरिक्तत्वे महानसीयत्वविशिष्टवह्न्यभावादिकमादाय वह्निमान् धूमादित्यादावव्याप्तिरित्यपि परास्तं। तादृशाभावप्रतियोगितावच्छेदकतायां महानसीय
त्ववि(शिष्ट)वह्नित्वोभयत्रपर्याप्त्युपगमेनोपदर्शितरीत्यानुपपत्त्यभावादिति। प्रकारान्तरेणाव्याप्तिलक्षणमाह॥ ॥अथ चेत्यादि। अनौपाधिकः त्वं व्याप्तिरित्यत्र अनौपाधिकत्वस्य पूर्वोक्ता
र्थकत्वे पूर्वोक्तदूषणगणग्रासादपरितोषादर्थान्तरमाह। तद्वेति। अनौपाधिकत्वमित्यर्थः। यावन्त्येति। अत्र हेतुपदं हेतुतावच्छेदकावच्छिन्नहेतुपरं। तथा च यावन्ति हेतुतावच्छेदकावच्छिन्नसमानाधिकरणाभा
वप्रतियोगितावच्छेदकानि तदवच्छिन्नप्रतियोगिताकात्यन्ताभावसमानाधिकरणयत्साध्यं तेन समं सामानाधिकरण्यं व्याप्तिरित्यर्थः पर्यवसन्नः। वह्निमान् धूमादित्यादौ धूमाधिकरणवृत्त्यभावप्रति
योगितावच्छेदकानि यावन्ति घटत्वपटत्वादीनि तदवच्छिन्नप्रतियोगिताकाभावसमानाधिकरणो यो वह्निस्तत्सामानाधिकरण्यस्य धूमे सत्त्वाल्लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ स्वयमेव तद्धस

मु॰ टी॰
३२
३१

रणासत्त्वं दर्शयति। नन्वेवमिति। एवं तादृशलक्षणाक्रान्तत्वं। सोपाधिः। व्यभिचारिहेतुः। एतन्निवेशे यथा स्यात्तथा नन्वेवमिति। व्यभिचारिहेतावित्यर्थः। प्रतियोगीन इति। प्रतियोगितावच्छेदकावच्छिन्न
स्याऽनेन। तथाविधार्द्रेन्धनासंयुक्तभावेन। तथा च धूमवान्वह्नेरित्यादौ धूमे तथाविधयावद्धर्माक्रान्तार्द्रेन्धनत्वावच्छेदकावच्छिन्नस्यानेन। अप्रतियोगिताकाभावसामानाधिकरण्यविरहात्तथा
विधसाध्यसामानाधिकरण्यहेतुनाऽविति नातिव्याप्तिरिति भावः। नन्वेतस्यानौपाधिकत्वरूपत्वे प्राचीनानां यावत्त्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वमिति प्रकारस्य विरो
धः स्यात्तत्राह। एतदेवेति। यथोक्तमनौपाधिकत्वमेवेत्यर्थः। अनौपाधिकत्वमित्यनन्तरमितिशब्दः पूरणीयः। गीयते। उच्यते। तथा च यावत्त्वव्यभिचारियत्स्य हेत्वधिकरणवृत्त्यभावप्रतियोगि
तावच्छेदकं यावत्स्वच्छिन्नार्थकत्वेन ह्युक्तौ तावद्व्यभिचारिपदस्य तद्भाववद्वृत्तित्वार्थकत्वेन च मयुक्तानौपाधिकत्वे एव प्राचीनप्रवादः। यदर्थवत्त्वमिति भावः॥ नन्वत्र यावत्त्वविशेषणं हेत्वधिकरणवृत्त्य
भावप्रतियोगितावच्छेदके तदवच्छिन्नेवा। नाद्यः। स एव तेन तथाविधयावदवच्छेदकावच्छिन्नस्यैकस्याप्रसिद्ध्याऽसंभवापत्तेः। न द्वितीयः। धूमवान्वह्नेरित्यादौ प्रतियोगिताः वह्न्यधिकरणवृत्त्यभावप्रति
योगितावच्छेदकावच्छिन्नं यावत् घटपटार्द्रेन्धनादिस्वरूपं तद्भाववद्वृत्तित्वस्य धूमे सत्त्वात् तथाविधयावत्त्वावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्। न च तथाविधाभावप्रतियोगितावच्छे

राम॰
३२

न्नं यावदन्यतमेकेन तद्भावकूटाधिकरणावृत्तित्वस्य निवेशान्नानुपपत्तिरिति वाच्यं। रूपवान्पृथिवीत्वादित्यादावव्याप्तेस्तथाविधाभावप्रतियोगितावच्छेदकावच्छिन्नयावदन्तःपातिनो घटत्वादिनोऽ
भावकूटाधिकरणावृत्तित्वस्य क्वापि रूपे सत्त्वात्। अत एव हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकं यावदन्यतमेकं तदवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणावृत्तित्वं निवेशनीयं रूपपि
यरात्तमिति चेन्न यद्धेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यावत्साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्साध्यसमानाधिकरणं तद्धेतुनिष्ठा तत्साध्यनिरूपिता व्याप्तिरि
त्यस्येव पदार्थनिरूपणावाक्यतामयात्। अत्राभावयोर्विशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताकत्वं विवक्षणीयं। अन्यथा प्रमेयवान्वह्नेरित्यादौ धूमत्वाधिकरणवृत्त्यभावप्रतियोगिताव
च्छेदकस्यापीन्धनत्वादेर्धूमाधिकरणावृत्तिसमवायसंबंधावच्छिन्नप्रतियोगिताकेन्धनाद्यभावप्रतियोगितावच्छेदकत्वेऽपि नव्याप्तिः। तथाविधविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताका
भावप्रतियोगितावच्छेदकयावदन्तःपातिनश्चेन्धनत्वस्य प्रकारकप्रमाविशेष्यत्वत्वादेर्धूमाधिकरणवृत्त्यभावीयविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वाभावादिति। अमतसर्व
सत्त्वमस्तीति विभावनापमिति। प्रकारान्तरेणानौपाधिकत्वं निर्वक्ति परेषां हि अप्रतियोगिति। प्रतियोगितानवच्छेदकावच्छिन्नेत्यर्थः। अतो न विशिष्टाभावादिकमादाय तथाविधाभावप्रतियो

गीत्वस्य सर्वत्र सत्त्वात्तथाविधाभावाप्रतियोग्यप्रसिद्ध्यासंभवापत्तिः। तथा च यावन्ति यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकानि तद्वच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यस्य
स्य तत्स्य तत्त्वमेवानौपाधिकत्वमिति लक्षणसमार्थः। अत्र यद्यप्यमपसदं साध्यपरं द्वितीययत्पदं हेतुपरं वह्निमान्धूमादित्यादौ वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यद्वह्नित्वादिकं तद्
वच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यस्य धूमे सत्त्वात् लक्षणसमन्वयः। धूमवान्वह्नेरित्यादावेतल्लक्षणासत्त्वं स्वयमेवाह सोपाधावितिव्यभिचारिणि हेतावविसर्पयः। अप्रतियोगिनः। प्र
तियोगितानवच्छेदकावच्छिन्नस्य। उपाधेरार्द्रेन्धनस्य। साधनाव्यापकत्वादिति साधनाधिकरणात्यन्ताभावप्रतियोगित्वनियमादित्यर्थः। तथा च धूमवान्वह्नेरित्यादौ वह्नेर्न तथाविधयावद्धन्तः पात्यार्द्रेन्धन
त्वावच्छिन्नप्रतियोगिताकात्यन्ताभावसामानाधिकरण्यसत्त्वान्न लक्षणसमन्वय इति भावः। न त्वत्रासंभवः सर्वत्र तथाविधप्रतियोगितानवच्छेदकमात्रधर्मावच्छिन्नप्रतियोगिताकैकाभावाप्रसिद्धेः
मवन्तयाविधाभावप्रतियोगितानवच्छेदकावच्छिन्नैयावत्त्वविशेषणात्त्रापमनुपपत्तिरिति वाच्यं तत्रापि तथाविधप्रतियोगितानवच्छेदकावच्छिन्ननिषयावत्त्वावच्छिन्नप्रतियोगिताकाभावस्य हेतुत्ववि
वक्षणे वह्निमान्धूमादित्यादावसंभवापत्तेः। तादृशयावत्त्वावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वेन वह्नेस्तदभाववद्वृत्तित्वस्यासत्त्वात्। यद्विनतथाविधप्रतियोगितानवच्छेदकावच्छिन्नयाव

न प्रमेयं तावद्भावकूटवद्वह्नित्वमत्र निवेश्यते न तथा व्याप्यसंभवः। सर्वत्र तथाविधयावद्वह्निः यत्तिन्नष्ठाकाशाभावस्य योऽभावः आकाशस्वरूपस्तदधिकरणतायाः अप्रसिद्धेः। अत एव
न तथाविधप्रतियोगितानवच्छेदकावच्छिन्नाभावो यावद्वह्निः प्रमेयं तदधिकरणाद्यनित्यं विवक्षणीयमपि यथारुत्तं न च सप्तमीनमनुषाश्रयणात्तथाविधप्रतियोगितावच्छेदकावच्छिन्न
प्रतियोगिताकाभाववेपावनियतासामानाधिकरण्याभावस्तत्वं अनौपाधिकत्वमिमर्थकरणान्नानुपपत्तिरिति वा। स्वंतथापि केवलान्वयिहेतावव्याप्तेर्लक्षणोपि दुर्वारत्वात्। नवीननये आ
काशाभावाभावानभ्युपगमेन तत्र तथाविधासंताभावप्रतियोगितानवच्छेदकावच्छिन्नाभावाप्रसिद्धेरिति चेन्मैवं। यत्साध्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छे
दकं यावद्धेतुतावच्छेदकावच्छिन्नाधिकरणान्नमभावप्रतियोगितानवच्छेदकं तत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं तद्धेतुतावच्छेदकावच्छिन्ननिष्ठमनौपाधिकत्वमित्यत्रोपदर्शि
तलक्षणतात्पर्येणानुपपत्त्यभावात्। अत्राभावयोर्विशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताकत्वं विवक्षणीयं। अतो न संबंधभेदमादाय अनुपपत्तिः। स्पष्टं सर्वं स्वयमूहनीयं। प्रका
रान्तरेण व्याप्तिलक्षणं निर्वक्ति यत्संबंधेनेत्यादि। साध्यतासंबंधिता अत्र यत्पदे साध्यतावच्छेदकावच्छिन्नपरैः संबंधित्वं सामानाधिकरण्यं तेन यादृशयत्साध्यतावच्छेदकावच्छिन्नसामानाधि

मु॰ टी॰
३४
34

करणावच्छेदकरूपवत्त्वे सति तत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति लक्षणवाक्यार्थः। न चैवं सति वह्नेर्वह्नित्वरूपेणाधूमव्याप्यतापत्तिः धूमसामानाधिकरण्यावच्छेद-
काद्रेन्धनप्रभववह्नित्वस्य वह्नौ सत्त्वादिति वाच्यं। यत्साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वे सति तत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्साध्यतावच्छेदका-
वच्छिन्ननिरूपिततद्रूपावच्छिन्नव्याप्तिरिति निष्कर्षेणानुपपत्त्यभावात्। अत्र वह्निमान् धूमादित्यादौ साध्यसामानाधिकरण्यावच्छेदकधूमत्ववत्त्वाद् धूमे लक्षणसमन्वयः। अत्रावच्छेदक-
त्वं स्वरूपसंबंधविशेषः। धूमत्वादेरिव द्रव्यत्वादिसामानाधिकरण्यस्य स्वरूपसंबंधरूपावच्छेदकत्वसत्त्वे प्रमाणाभावे। नासंभवायत्तिरिति तु नाशंकनीयं धूमो वह्निव्याप्य इत्याकारकधूमत्वावच्छे-
देन वह्निव्याप्यत्वावगाहिव्यवहारस्यैव तत्र मानत्वात्। अन्यथा तद्धर्मे अवच्छेदकतासंबंधेन तदवगाहिन एव तद्धर्मावच्छेदेन तदवगाहित्वपर्यवसाने न तत्साध्यमत्वावच्छेदेन वह्निव्याप्यत्वाव-
गाहिप्रत्यर्थत्वानुपपत्तेः। न चैतादृशव्यवहारस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वमेव विषय इति वाच्यं। स्वरूपसंबंधरूपावच्छेदकत्वविषयकत्वे बाधकाभावात् यथाकल्पनायाः अप्रामाण्यत्वात्। न
चैवं सति द्रव्यं सत्त्वादित्यादावतिव्याप्तिः सत्तात्वावच्छेदेन द्रव्यत्वव्याप्यत्वव्यवहाराभावेन सत्तात्वे द्रव्यत्वव्याप्यतायाः स्वरूपसंबंधरूपावच्छेदकत्वस्यानभ्युपगमादिति। न वात्र साध्यसामानाधिक- राम॰
३४

रण्यावच्छेदकहेतुतावच्छेदकत्वमिदमेवस्य प्रकृष्टं किं द्वितीयसाध्यसामानाधिकरण्यनिवेशेनेति वाच्यं तथा सत्यभेदेनावच्छेद्यावच्छेदकभावानभ्युपगमे धूमत्वादेरेतादृशव्याप्यत्वावच्छेदकतया धूमत्वे
वह्निव्याप्यत्वावच्छेदकत्वाभावापत्तेः धूमो वह्निव्याप्य इति व्यवहारानुपपत्तेः द्वितीयसाध्यसामानाधिकरण्यनिवेशस्यावश्यकत्वादिति वह्निमान् धूमादित्यादौ एतद्व्याप्यतासत्त्वं प्रदर्शयितुं तथा हि सा
दिधूमस्य वह्निसंबंधित्वेऽप्यत्र समव्याप्तिः षष्ठ्यर्थकत्वेन धूमनिष्ठवह्निसामानाधिकरण्यस्यैवार्थः । अवच्छेदकं स्वरूपसंबंधरूपावच्छेदकताश्रयः । धूममात्रस्य यावद्धूमस्य वह्निसंबंधित्वात् वह्निसा
मानाधिकरण्यात् तथा च महानसाधिकरणवृत्तेरेव तत्र स्वरूपसंबंधरूपावच्छेदकत्वानभ्युपगमेन धूमसत्त्वे वह्निसामानाधिकरण्यानधिकरणावृत्तितया वह्निसामानाधिकरण्यस्य स्वरूपसंबंधरूपावच्छेदक
त्वस्यावश्यकत्वात् न तु यावद्वह्निमान् धूमादित्यादौ लक्षणासमन्वय इति भावः । धूमवान् वह्नेरित्यादौ वेतद्व्याप्यतासत्त्वमिति पारयति वह्नेस्तु धूमसंबंध इति अत्रापि विषयसप्तमी तुशब्दोऽभिन्नक्रमे तथा च
वह्निनिष्ठधूमसामानाधिकरण्यस्यैवार्थः । न च वह्नित्वमवच्छेदकं न स्वरूपसंबंधरूपावच्छेदकताश्रयः । धूमासंबंधिनि धूमासमानाधिकरणे अयोगोलकीयवह्नौ गतत्वात् वह्नित्वस्य सत्त्वात् तथा
च धूमसामानाधिकरण्यस्य वह्नित्वेऽप्रसक्तेरिति तन्न तस्य स्वरूपसंबंधरूपावच्छेदकताश्रयः अतो न धूमवान् वह्नेरित्यादावेतद्व्याप्यताव्याप्तिरिति भावः अतिप्रसक्तधर्मे स्वरूपसंबंधरूपाव

मु.टी.
३५
३५

छेदकत्वांगीकारे बाधकमाह नहीति। अवच्छेदकं स्वरूपसंबंधरूपावच्छेदकताश्रयः संयोगादेर्न धात्वादर्शनात् हृदवृत्तिकपिसंयोगादौ अतिप्रसंगाच्च अवच्छेदकत्वादर्शनात् अतिप्रसंगे स्वरूपवृत्ति
कपिसंयोगावच्छेदकत्वापत्त्या यादृशेति पावतत्तत्पदार्थातिप्रसंगः स्यात् अवच्छेदकत्वे द्रव्यत्वेपि हृदवृत्तिकपिसंयोगावच्छेदकत्वापत्तिरिति भावः। नन्वेवं समवायेन धूमप्रभववह्नित्वावच्छिन्नावच्छेदधूमत्वव्याप्यत्वापत्ति
रित्यत्र व्यापत्तिमाहङ्कुर्वित्यादि धूमसंबंधित्वावच्छेदकं धूमसामानाधिकरण्यावच्छेदकं तादृशसमवायेन धूमप्रभववह्नित्वावच्छिन्नं। व्याप्यमेवं धूमत्वावच्छिन्ननिरूपितव्याप्त्या आश्रय एव अभेदेनावच्छेदा
वच्छेदकाभावाभ्युपगमे तु पूर्वोक्तलक्षणे द्वितीयसामानाधिकरण्यशरीरस्यैव वैयर्थ्यमित्युपहास्यलक्षणमाह अथवेत्यादिना स्वस्वरूपमितिपदद्वयेनोपपत्तिः। अत्र तन्न साध्यतावच्छेदकावच्छिन्नसाध्यसा
मानाधिकरण्यावच्छेदकतद्रूपवत्त्वं तत्र साध्यतावच्छेदकावच्छिन्ननिरूपितानुपाधिकत्वावच्छिन्नाभावाप्रतियोगित्वमिति निष्कर्षो बोध्यः। अतो न पूर्वोक्तानुपपत्तिरिति अत्राप्यवच्छेदकत्वं स्वरूपसंबंध एव एतल्लक्ष्ये लक्षणं वह्नि
मान् धूमादित्यादौ संगमयति वह्निसामानाधिकरण्यमिमाहिहि यस्मात् धूमनिष्ठवह्निसामानाधिकरण्यं धूमत्वेनावच्छिद्यते धूमत्वावच्छिन्नं धूमनिष्ठवह्निसामानाधिकरण्यावच्छेदकं धूमत्वमिति यावत्। अतो
वह्निमान् धूमादित्यत्र लक्षणसमन्वय इति शेषः। धूमवान् वह्नेरित्यादौ च नैतल्लक्षणासत्त्वं यत इत्याह यत्नेति सोपाधौ लिङ्गत्यादि। तुशब्दोऽत्रैवकारार्थो भिन्नक्रमेण तथा च सोपाधावुपाधिनैव साधनतावच्छेदकता

राम०
३५

यथाप्रधिकरणाभिन्नत्वे गौरवं साध्यसामानाधिकरण्यं अवच्छिन्नमत इति नास्ति व्याप्तिरिति शेषः । ननु सोपाधिनिष्ठसाध्यसामानाधिकरण्यस्य स्वरूपसंबंधरूपावछेदकमाश्रयः । यथान
साधनतावछेदकं तत्रोपाधिविपिनमानाभावात् तथा चोक्तलक्षणे धूमवानार्द्रेन्धनप्रभववह्निमानित्यादौ सामानाधिकरण्यसंबंधावछिन्नहेतुतावछेदकस्थले व्याप्तिरिसत्त्व आह अत ए
वेति पनएव सामानाधिकरण्यसंबंधेनोपाधिः साधननिष्ठसाध्यसंबंधितावछेदकः अतएवेत्यर्थः । साधनतावछेदकेत्यादि अत्र साधनतावछेदकभिन्नेनेति स्वरूपकथनं । येनेत्यस्यावछिद्य
नइत्यनेनान्वयः । तथा च यत्साधनाभिमतनिष्ठसाध्यसंबंधो येनावछिद्यते यत्साधनाभिमतनिष्ठसाध्यसंबंधितावछेदकीभूतो यो धर्म इति यावत् तत्र साधने स एव विशेषणांस एव धर्मः उ
पाधिरिति वदन्ति । उपाधिरिति नियमं प्राभाकरा अपि वदन्ति तत्साधनीयोपाधित्वव्यापकं तत्साधनाभिमतनिष्ठसाध्यसंबंधितावछेदकसमितिप्राभाकरा अपि वदन्तीत्ययं विशिष्टोर्थः साध्य
संबंधितावछेदकत्वमित्यत्रावछेदकत्वं स्वरूपसंबंधविशेषस्तथा चार्द्रेन्धनप्रभववह्न्यादौ साध्यसंबंधितायाः स्वरूपसंबंधरूपावछेदकत्वाभावेपि तत्तद्धर्मे प्राभाकराणामुपाधित्वव्यापकत्व
कथनमसंगतं स्यादिति तेषां तथाविधव्यवहारबलादेवोपाधौ साधनाभिमतनिष्ठसाध्यसंबंधितायाः स्वरूपसंबंधरूपावछेदकत्वस्वीकारावश्यकतया नोक्तदोष इति भावः । नचक्तत्राप्युक्त

मु॰ टी॰
३६
36

मित्वरूपत्वस्याविधावच्छेदकत्वमाद्यायैव निरुक्तधर्मस्योपाधित्वव्यापकत्ववर्णनं निर्वाहेत्वर्थमुपाधौ साधनाभिमतनियतसाध्यसंबंधिताया: स्वरूपसंबंधरूपत्वावच्छेदकत्वस्वीकारेणेभिवाच्यं वक्तोऽन्या
न्यूनवृत्तित्वसामानाधिकरण्यसंबंधावच्छिन्नव्यापकत्वं विनाऽसदुर्वचत्वं न संभवति सामानाधिकरण्यसंबंधस्य न्यूनत्वनियामकतया व्यापकत्वाघटकत्वादिति। ननु निरुक्तधर्मेणोपाधित्वव्या
पकः विरुद्धस्थलीयोपाधौ तस्याभावान्साधनाभिमतनिष्ठसाध्यसंबंधीतायाऽप्रसिद्धत्वान्नेति निरुक्तधर्माप्रसिद्धेरित्यत आह अन्यत्र एवं नियत एव विरुद्धे हेतुर्न तन्मते सोपाधिरन्त एवेत्य
र्थः। तत्र तन्मते साधनावच्छिन्नसाध्यव्यापकत्वं सामानाधिकरण्यसंबंधेन साधनविशिष्टं पक्षसाध्यं तद्व्यापकत्वं वा लक्षणांतर्गताघटितं लक्षणांतरं तन्मते सर्वत्र साधनविशिष्टसाध्यव्यापकस्यैवोपा
धितयाऽनेन लक्षणीयसाधनावच्छिन्नसाध्यव्यापकोपाधावव्याप्तिः। तन्मते तस्या लक्ष्यत्वादिति ध्येयं। मयाऽपचयदितन्मते विरुद्धहेतौ उपाधिः स्यान्न तु तन्मते व्याप्यत्वासिद्धत्वानिरुक्तोपाधि
लक्षणमसंगतं स्यादिति तन्मते विरुद्धहेतावुपाध्यभावेन न निरुक्तधर्मस्योपाधित्वव्यापकत्वहानिरिति भावः। ननु तेषां मते विरुद्धहेतावुपाध्यनंगीकारे बीजाभावः। न चोपाधिलक्षणानुपपत्ति
रेव बीजं साध्यसाधनभेदेनोपाधिलक्षणानभिज्ञतया तत्र साधनावच्छिन्नत्वविशेषणमपहायोपाधिलक्षणासंभवादित्यतो विरुद्धस्थलीयहेतावुपाध्यनंगीकारे बीजमाहुरस्य भिवारिणीसा

राम॰
३६

दि। अवच्छेदकभेदं विनैकत्रैकधर्मविशिष्टे साध्यतदभाववतोर्विरोधेन विरुद्धयोस्तदुभयसंबंधिनोः सामानाधिकरण्यात्मकोनयोरभावात् तयोरवस्थानासंभवात् अवश्यं व्यभिचारिसाधने साध्य
वद्वृत्तित्वसाध्याभाववद्वृत्तित्वोभयविशिष्टसाधनतावच्छेदकत्वेनाभिमतधर्मावच्छिन्ने साध्यसंबंधितावच्छेदकमस्ति साध्यसंबंधितावच्छेदके स्वीकार्यतदेव व्यभिचारिनिष्ठसाध्यसंबंधितावच्छेद
कमेवोपाधिः। उच्यत इति शेषः। तथा चैकधर्मावच्छिन्नेऽवच्छेदकभेदं विना विरुद्धयोः साध्यवद्वृत्तित्वसाध्याभाववद्वृत्तित्वरूपयोः साध्यसंबंधित्वसाध्याभावसंबंधित्वयोरवस्थानासंभवेन विरोध
भंजनार्थमुपाधिस्वीकारः। यत्र तु न साध्यसंबंधित्वसाध्याभावसंबंधित्वोभयं तत्रोपाधिस्वीकारे निरर्थकत्वे स्यैव निरूपकस्य लेनाभ्यनेत उपाध्यनंगीकारे बीजमिति भावः। ननु साध्यतदभावसंबंध
योर्विरोधे मानाभावादुपाधेरुपदर्शितबीजं न संभवतीत्यत आह। अत एवेति। यत एव साध्यतदभावसंबंधयोरपि विरोधः स्वीक्रियते अत एवेत्यर्थः। व्यभिचारे चावश्यमुपाधिरिति।। व्यभिचा
रे उपाधिव्याप्यत्वमवाद इत्यर्थः। तदुभयसंबंधयोर्विरोधानंगीकारे व्यभिचारितिविरोधभंजनफलकोपाधिस्वीकारस्य निरर्थकतया व्यभिचारे उपाधिसामानाधिकरण्यमेव दुर्लभं सुतरां न तज्जो
पाधिव्याप्यत्वमिति तथाविधप्रवादः। सेगत एव स्यादिति भावः। ननु तादृशनियमस्य अप्रामाणिकतया तथाविधप्रवादोपि न येत्यत आह। असमये त्वादि। असमयामादृशानियमानंगीका

मु.टी. ३७

37

रेव्यभिचारीत्येवंहेत्वंतरस्यव्यभिचारित्वेनतत्रागमकत्वेउपाध्यननुमापकत्वेव्यभिचारित्वेननन्वेतदनुमानेव्यभिचारिहेतुनासांप्रदायिकानामुपाध्यनुमानंनस्यात्।अप्रयोजकत्वात्।व्यभिचारि
त्वलिंगेउपाध्यनुमानप्रयोजकव्याप्तेरभावात्।तथाचसांप्रदायिकानांतथाविधानुमानानुपपत्त्यातथाविधनियमस्वीकारआवश्यकइतिभावः।उपाधौसाध्यसंबंधितायास्वरूपसंबंधरूपा
वच्छेदकतायांप्रभाकराणांसंवादंदर्शयतिसोपाधौसाधनतावच्छेदकेसाध्यसंबंधितावच्छेदकंनभवतीत्यत्राचार्याणांसंवादमाह।अतएवेति।यतएवसोपाधौसाधनतावच्छेदकंनसाध्यसं
बंधितावच्छेदकंअतएवेत्यर्थः।नस्येति।साध्यसमव्याप्तस्येत्यर्थः।यद्यस्यार्थेऽन्त्रहजिलंघ्यापिरिस्यात्रान्येति।साधनस्याभिमतेव्यभिचारिसाधननिष्ठसाधनतावच्छेदकेचकास्ति।तादात्म्य
संबंधेनभ्रमविषयताश्रयोभवति।इतीति।।इतिकृत्वेत्यर्थः।तथाचव्यभिचारिस्थलेसाधनतावच्छेदकस्यसाध्यसंबंधितावच्छेदकत्वेव्यभिचारिनिष्ठसाधनतावच्छेदकेसाध्यसंबंधितानि
रूपितस्वरूपसंबंधरूपावच्छेदकत्वविशिष्टस्यसमव्याप्तस्येतिधर्मस्यतादात्म्यसंबंधेनभ्रमोनस्यात्तत्तथाविधावच्छेदकत्वस्यसाधनतावच्छेदकेसत्वादितिभावः।ननुतथाविधभ्रमाभावेकाक्षति
रित्यतआह।स्फटिकइत्यादि।यथास्फटिकेस्वनिष्ठलौहित्यभ्रमजनकत्वात्जपाकुसुममुपाधिरुच्यते।तथासाध्यसमव्याप्तोपिव्यभिचारिसाधननिष्ठसाधनतावच्छेदकेस्वनिष्ठसाध्यसामाना राम. ३७

धिकरणावच्छेदकत्वविशिष्टस्य नाद्यात्म्यसंबंधेन भ्रमजनकत्वेन उपाधियद्वाच्यो भवतीत्यर्थः।उपसमीपवर्त्तिनि आदधाति स्वीयं धर्म्मं संक्रामयतीत्युपाधिपदस्य योगार्थत्वादिति शेषः।
ननूपाधिपदस्य योगार्थत्वादेवोपाधिव्यवहारविषयत्वे महानसत्वमपि उपाधिव्यवहारविषयः स्यात् तत्रापि उपाधिपदयोगार्थत्वसत्वात्।नच हेतौ एकाधिकरणमन्तर्भाव्य व्यभिचारित्वं
साध्यव्यभिचारित्वं च तत्र वृत्तित्वे सर्वे साध्यसमानाधिकरणाः सदुपाधयो भवन्तीत्यर्थकात्सर्वे साध्यसमानाधिकरणाः सदुपाधयः हेतोरेकाश्रये येषां तु साध्यव्यभिचारित्वे निम्यायादिद्वषमेवेतिवा
च्यो।समव्याप्तस्यैवोपाधित्वमंगीकुर्वतामाचार्य्याणां मते यात्विशेषायमेरसंभवादित्यत आह।लक्षणं त्विति।उपाधिपदप्रवृत्तिनिमित्तावच्छेदकं त्वित्यर्थः।साध्यसाधनसंबंधेत्यादि।अत्र साधनसंबं
धपदं साध्यतावच्छेदकसंबंधेन साध्यव्यापकतालाभार्थं।विरुद्धहेतोरपि सोपाधित्वमंगीकुर्वतामाचार्य्याणां उपाधिपदप्रवृत्तिनिमित्तावच्छेदके तन्निवेशे तस्य तन्नाधारणानुपपत्तेः।प्रयोजनाभावा
द्वा।तथाच साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्यर्थः।तथाच महानसत्वादावुपाधिपदयोगार्थत्वसत्वेपि उपाधिपदरूढ्यर्थत्वाभावान्न तत्र हेतौ महानसत्वं उपाधिरिति न व्यवहारः।त
थाविधोपाधिव्यवहारे उपाधिपदरूढ्यर्थत्वविशिष्टयोगार्थत्वस्यैव नियामकत्वादिति भावः।नन्वेवं सति धूमवान् वह्नेरित्यादौ आर्द्रेन्धनादिरूपविषमव्याप्ते उपाधिव्यवहारो न स्या

मु·दी·
३८

रित्यत्रेष्टापत्तिमाह। विषमव्याप्तत्वित्यादि। नोपाधिपदवाच्यः। नोपाधिपदव्यवहारविषयः। यथाश्चेतविषमव्याप्तेष्पुत्रत्वादिनिरूप्यधर्मस्य सत्वादुपाधिपदवाच्यत्वस्यैवानुपपत्तेः। नहि या
गार्थतावच्छेदकविशिष्टस्य धर्मितावच्छेदकमेवोपाधिपदप्रवृत्तिनिमित्तं येन प्रवृत्तिनिमित्ताभावेन विषमव्याप्तमुपाधिपदवाच्यं न स्यात्। तथा सति स्फटिके जपाकुसुमादावुपाधिपदवाच्य
त्वं न स्यादिति। प्रवृत्तिनिमित्ताभावादिति। व्यभिचारित्वहेतुत्वे उपाधिव्यवहारनियामकस्योपदर्शितरूपस्याभावादित्यर्थः। नन्वेवं सति विषमव्याप्तः दूषको न स्यात्तत्राह विघटउपाधिव्यवहा
रविषयस्यैव दूषकत्वनियमादित्यत आह। दूषकतावेत्यादि। तस्य विषमव्याप्तस्य व्यभिचारोन्नायकतया साध्यव्यभिचारोन्नायकीभूतव्यभिचारप्रतियोगितया। तथा च नाद्यनियमे मानाभाव इति
भावः। ननु साध्यव्यभिचारोन्नायकत्वमेवोपाधिपदस्य प्रवृत्तिनिमित्तावच्छेदकं न तु साध्यव्यापकत्वे सति साधनाव्यापकत्वं गौरवात्तत्राह चकारेण तस्य स्वरूपस्य प्रवृत्तिनिमित्तावच्छेदकत्वोपि रित्याशंकां निराकरोति। न चैवमि
त्यादिवादिविशेषः। व्यभिचारोन्नायकत्वं। साध्यव्यभिचारानुमितिजनकतावच्छेदककोटिप्रविष्टत्वं। जनकत्वं चात्र स्वरूपसंबंधविशेषो ज्ञेयः। अनन्यथासिद्धनियतपूर्ववृत्तित्वरूपस्य
तस्यानिवेशात्पूर्ववृत्तित्वस्यापालाघवानवकाशादिति ध्येयं। उपाधित्वे उपाधिपदप्रवृत्तिनिमित्तावच्छेदकं प्रयोजकेत्यादि। अनुकूलतर्कसत्त्वाभावरूपाप्रयोजकत्वसाध्यव्यापकत्वपि वा विरोधादित्यर्थः॥ उपा

राम०
३८

धिपदरूपव्यर्थतापत्तेरित्यर्थः। न तथा च अयं हेतुः साध्यव्यभिचारी अप्रयोजकत्वात् साध्यव्यापकव्यभिचारित्वाद् इत्यनुमानसंभवेन तत्पोक्तव्याविधानुमितिजनकतावच्छेदककोटिप्रविष्टत्वादुपा
धिपदस्य व्यर्थतापत्तिरिति भावः इति व्याप्तिवादरहस्ये सिद्धान्तनिष्कर्षः ॥ ॥ श्रीवेंकटेशो जयति ॥ ॥ यत्र घटनिराकरणपूर्वकं प्रसंगात् व्याप्तिग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुप
न्यस्यति। सेयमित्यादिमारभ्य मेवमित्यादिना। सेयं पूर्वनिरुक्ता। न भूयोदर्शनगम्या। न भूयः सहचारदर्शनजन्यप्रत्यक्षविषया। अथ व्याप्तेर्भूयोदर्शनजन्यप्रत्यक्षविषयत्वाभावो न सा
ध्यः कस्यापि प्रत्यक्षस्य भूयोदर्शनाजन्यतया भूयोदर्शनजन्यप्रत्यक्षाप्रसिद्ध्या तद्विषयत्वाभावस्य साध्याप्रसिद्धेः। न हि विशिष्टबुद्धिं प्रति विशेषणज्ञानस्येव उपनीतभानं प्रति उपनायकज्ञा
नस्य वा हेतुता तन्मते सिद्धा येन तथाविधजन्यतामाश्रित्य तन्मतेन तथाविधप्रत्यक्षप्रसिद्धिः स्यात् न च विशिष्टवैशिष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुतायाः प्राभाकरमतसि
द्धतया तन्मतेन भूयोदर्शनजन्यप्रत्यक्षप्रसिद्धिः साध्यसामानाधिकरण्यात्मकसहचारविशिष्टहेतुवैशिष्ट्यावगाहिप्रत्यक्षस्य भूयः सहचारदर्शननिरूपितस्वरूपयोग्यतारूपजनकताति
रूपकत्वरूपतज्जन्यत्वसत्त्वादिति वाच्यं तथा सति बाधापत्तेः साध्यसामानाधिकरण्यात्मकसहचारघटितव्याप्तिविशिष्टवैशिष्ट्यावगाहिबुद्धेरपि तादृशज्ञानात् अनन्तरं काले उपाधिविधया

मु॰टी॰
३९
39

भूयः सहचारदर्शनानां प्रत्यक्षस्वरूपयोग्यतयाननादृशानां प्रत्यक्षत्वाप्रसिद्धेरित्यपि परास्तं बाधानुद्धारादिति चेन्नैवं व्याप्तिनिर्भयोर्दर्शनानामेतत्स्वसहचारदर्शननियमभूयस्त्वं व्याप्तिजनकताव
च्छेदकं नेत्यर्थस्तस्य च तन्न चात्राप्यप्रसिद्धिः तन्मतेऽपि सन्निकर्षादिहेतुकत्वधर्मेणैव तादृशज्ञानजनकतावच्छेदकप्रसिद्धेरिति। अत्र व्याप्तिमत्त्वस्य ज्ञानजनकतावच्छेदकत्वाभावादिति हेतुः पूरणीयः साध्य
स्य तु अन्योन्याभावगर्भत्वान्न हेतोः साध्याविशेषः। अत्र च स्वहेतुमुपपादयति दर्शनानामित्यादिना। तथा च साध्यसामानाधिकरण्यविषयकैकज्ञानादपि व्याप्तिग्रहस्य स्वोपस्थापर्याप्ति
रिक्तसंबंधेन भूयस्त्वेन व्याप्तिग्रहजनकतावच्छेदकमिति भावः। ननु पर्याप्तिसंबंधेन भूयस्त्वं व्याप्तिग्रहविष्यतीत्यत आह आद्यमादिरिति। आशुविनाशिनां तृतीयक्षणोत्पन्नध्वंसप्रतियोगिनां
क्रमिकाणां क्रमोत्पन्नानां युगपदुत्पन्नानामिति यावत् मेलकाभावात्। सहावस्थानाभावात्। एकक्षणवृत्तित्वाभावादिति यावत्। अत्र तृतीयक्षणोत्पन्नध्वंसप्रतियोगिनां युगपदुत्पन्नघटत्रयस्य
परस्परमेलनसंभवादाह क्रमिकाणामिति। क्रमोत्पन्नानामपि चिरकालावस्थायिनां घटादीनां मेलनसंभवादाह आशुविनाशिनामिति। तथा च व्यतिरेकव्यभिचारेण पर्याप्तिसंबंधेन भूयस्त्वं
न जनकतावच्छेदकमिति भावः। ननु भूयस्त्वविशिष्टसहचारदर्शनजन्यसंस्कारद्वारा व्याप्तिग्रहं प्रति हेतुरस्तु तेनानुपपत्तिरित्याशंकते। न वेत्यादि। तावद्दर्शनजन्यसंस्काराः। भूयःसहचा राम॰
३९

रदर्शनजन्यसंस्काराः व्याप्तिधीहेतवः। व्याप्तिप्रमास्थले हेतवः। न चालकल्पनात्। संस्कारसहकारित्वकल्पनात्। समानविषयकइति। स्वसमानविषयको यः स्वयं संस्कारपरे। प्रत्यभिज्ञा
न इति। प्रमायां स्थलस्य सर्थः। इदमपि स्वविषयकत्वेनैवोपनायकत्वमते बोध्यं। अन्तइति। व्याप्तिप्रमास्थलस्य सहचारगोचरसंस्कारसमानविषयकत्वाभावादित्यर्थः। व्याप्तिज्ञाने। व्याप्तिप्रमास्थ
न तथा च तत्प्रकारतानिरूपितनद्विशेष्यताशालिसंस्कारेणैव तत्प्रकारतानिरूपितनद्विशेष्यताशालिस्मरणं प्रसंवोत्पद्यतेइति नियमात्। कथं व्याप्तिघटकव्यापकत्वाविषयकसह
चारगोचरसंस्कारे व्याप्यव्यापकसामानाधिकरण्यात्मिकव्याप्तिप्रमास्थले समुत्पादनीयमिति भावः। नन्वत्र क्वचिद्दृष्टि· यमः नतावत्संस्कारः स्वाविषयविषयकज्ञानाजनकः इत्याकारकः संस्का
रस्योपनायकत्वमते रजतगोचरसंस्कारादिदं रजतमिति भ्रमानुत्पादापत्तेः यदि च भ्रमस्थले गृहीतमेदं रजतनहूबंमि(?) सुखानेनेत व्यापि घटगोचरपटगोचरसंस्कारान्यां घटपटगोचरसमूहालंबना
त्मकस्मरणानुत्पादप्रसंगस्य दुर्वारितापत्तिः यदि च संस्कारान्यां समूहालंबनस्मरणं नोत्पद्यते अपि तु क्रमिकस्मरणाद्वयमिति उपेयते तत्र व्यापि पटगोचरसंस्कारात्तद्भूतलन्ह(?) त्रिसन्निकर्षा
दुत्पन्नं घटवद्भूतलमित्याकारकोपनीतभानमाह यनियमे व्यभिचारो दुर्द्धरावननावत्संस्कारस्य स्वविषयविषयकज्ञानजनकत्वनियमो वाच्यः व्याप्तिप्रमास्थलस्य सहचारगोचरसंस्का

मु॰टी॰
४०

रविषयधर्मादिविषयतयातस्यतज्ज्ञानस्यापिप्रकृतनियमात्स्तेः अत एव संस्कारस्य स्वविशेष्यविशेष्यकत्वनियमोऽपि नेति निर्विकल्पसंस्कारनिषेधनकृतास्वानवच्छेदकीभूतविषयताघ
टितधर्मावच्छिन्नज्ञानस्य तानिरूपितानभवतीति नियमाभ्युपगमेनानुपपत्त्यभावात्। नचैवं सति भ्रमस्तु अगृहीताभेदज्ञानद्वयं मिथ्याद्वितीयेरो मरणीयमन्वयविरोधं उपतादृशनियमांगी
करणमिति भ्रमस्यापि विशिष्टज्ञानत्वेनानुपपत्त्यभावादिति वाच्यं तावतामसम्भवादिति। भ्रमस्येति। तथाविधनियमानभ्युपगमे इत्यर्थः। अतिप्रसंगादिति। घटगोचरसंस्कारादपिपटो
द्बोधस्मरणापत्तिरित्यर्थः। भूयोदर्शनेत्यस्य दुर्वचतयानेनेनरूपेण व्याप्तिग्रहसहजनकत्वसंभवे द्विरूपणान्तरमभिधातुं पृच्छति। किंचेति। अत्र वक्ष्यमाणत्तुरन्यपर्यसंबंधः सहचारः तं
यावयत्सहचारभूयोदर्शनसंस्कारद्वारा व्याप्तिग्रहसहजनकत्वमुत्पत्यसाहेतुसाध्यानां वा सहचारदर्शनभूयस्त्वविशिष्टं हेतुसाध्यसहचारदर्शनं वा प्रकृते भूयोदर्शनशब्दार्थ इति कृत्वा विकल्पमद
त्याशंक्यदूषयति। भूयःसुस्थानेष्वित्यादि। स्थानेषु अधिकरणेषु। अत्र सप्तम्यर्थस्य वृत्तित्वस्य दर्शनपदार्थसाध्यहेतुसहचारदर्शनैकदेशे साध्ये साधने वान्वयेनान्वयः। भूयसा। अने
कसाध्यहेतुमतां दर्शनं। सहचारदर्शनं। दर्शनानि साध्यहेतुसहचारदर्शनानि। ननु तथा। नव्याप्तिग्रहस्य हेतुः। तत्राद्यं दूषणमाह एकत्रेति। एकाधिकरणवृत्तित्वरूपस्य परस्परयोरित्यर्थः॥ द्वितीय राम॰
४०

येदूषणमाह इत्थं तत्र परत्वयोरश्रेति। तृतीये दूषणमाह। एवं चैवेति। एकमहानसरूपाधिकरणमंतर्भाव्य चेत्यर्थः। धारावाहिकेति। वह्निधूमसहचारविषयकानेकज्ञानेसतीत्यर्थः। तद्वृष्टिप्रसंगा
त्। धूमभिन्नेषु वह्निनिरूपितव्याप्तिबुद्धिप्रसंगात्। दूषणांतरमाह। भूयस्त्वस्येत्यादि। त्रित्वचतुष्ट्वादित्वेन। त्रित्वचतुष्ट्वादिरूपत्वेनाननुगमादिति। अनुगतभूयस्त्वस्याभावादित्यर्थः। न च व्या
प्तिग्रहं प्रति नियतविशेषसहचारदर्शनत्वेन हेतुता। त्रिचतुरादिदर्शनसाधारणस्य भूयस्त्वस्येवाभावात्। अपितु त्रित्वविशिष्टसहचारदर्शनत्वचतुष्ट्वविशिष्टसहचारदर्शनत्वादिना
तत्र हेतुता कल्पनीयाऽतन्त्र न संभवति चतुष्ट्वविशिष्टसहचारदर्शनत्वेनापि तथाविधदर्शनाहेतुन हेतुतानवच्छेदकचतुष्ट्वादिविशिष्टतथाविधदर्शनत्वेनापि) त्रयाद्याप्तिग्रहस्य स्यात्पत्तेरिति भावः। ननु
व्याप्तिग्रहं प्रति त्रित्वविशिष्टसहचारदर्शनत्वेन हेतुतानवच्छेदकचतुष्ट्वादिविशिष्टतथाविधदर्शनत्वेनापि सत्येव व्यभिचारस्य दर्शितत्वात् तत्र चैवं सत्यपि व्यभिचारः दर्शने(ऽपि) तथा चान्वयव्यभि(चा
रेण त्रित्व) चतुष्ट्वपंचत्वे दर्शनत्रयस्यावश्यकत्वादित्यत आह। अपि चेति। दर्शनेऽपि। सहचारदर्शनेऽपि। तथा चान्वयव्यभिचारे त्रित्वविशिष्टसहचारदर्शनत्वेनापि तत्र हेतुताकल्पनस्याव
श्यकत्वादिति भावः। ननु व्याप्तिग्राहकतर्करूपतत्कारणांतराभावात् नोपदर्शितस्थलेऽन्वयव्यभिचारे इत्यभिप्रायेणाशंकते। तर्कसत्त्वेनेत्यादि। न च। त्रित्वविशिष्टसहचारदर्शनं हेतुः।

मु॰टी॰ ४१ ५।

सहचारेत्यादि। सहचारदर्शनसहकृतो व्यभिचारज्ञानाभावसंपादकः तर्क एव व्याप्तिग्राहकोस्तु व्याप्तिग्रहे संप्रति सहकारित्वेन तद्धेतुताया आवश्यकत्वादिति किं सहचारदर्शनेनेति भय
पत्तस्य व्याप्तिग्रहस्य कारणतावच्छेदकत्वेनेत्यर्थः। ननु मास्तु व्याप्तिग्रहे संप्रति भयस्त्वविशिष्टसहचारदर्शनत्वेन हेतुता तत्र तस्य प्रयोजकतात्वस्यैव भयः सहचारदर्शनं विना न तर्कप्र
सौभूतायाद्यनिरूपितायाः कतिषु व्याप्तिग्रहासंभवादित्यभिप्रायेण शंकते नन्वेवेति। नन्विना। भयः सहचारदर्शनेन विना। तर्क एव नावतरति। तर्कमूलीभूतव्याप्तिज्ञानमेव न संभवती
त्यर्थः। शंकां निरस्यति। प्रथमेति। प्रथमदर्शनेपीत्यादिना। प्रथमदर्शनेपि। भयः सहचारदर्शनं विनापि। भूयस्त्वस्य अग्रस्त्वतः सिद्धव्यभिचारशंकाविरहवतः। तर्कसंभवात्। तर्कमूलीभूतव्याप्ति
ज्ञानसंभवात्। तथा च व्याप्तिग्रहे सम्भूयः सहचारदर्शनस्य प्रयोजकत्वमपि नास्तीति भावः। एवमेवेति। व्याप्तिग्रहस्य संप्रति तर्क एव हेतुरित्यर्थः। व्याप्तिग्रह मूलकत्वेनेति। तर्कमूलकव्या
प्तिग्रहमूलकत्वेनेत्यर्थः। अनवस्थानादिति। तर्कं विना व्याप्तिग्रहस्यावस्थानासंभवात्। तथा च तर्कधाराकल्पने गौरवं ग्रासेन व्याप्तिग्रहस्य संप्रति तर्कस्य हेतुत्वं न संभवतीति भावः। शंकते ज्ञा
तमात्रस्येति। अत्र केवलसाधनत्वानुमितिः निरूपितजनिकावच्छेदकविषयमहत्त्वविशेष्यकावच्छेदसाधनत्वानुमितिसामग्री जनकं यद्व्याप्तिज्ञानं तत्र — येन अन्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रति राम॰ ४१

योगीत्वं तत्रैव साधनत्वमित्याकारकं यत्र यत्र धूमस्तत्रान्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रतियोगीत्वं तत्रकाधिकरणावृत्तित्वरूपस्यासामर्थ्येनैवाधिकरणावृत्तित्वविषयकत्वमेव हेतोरेवा
द्वित्तिदोषः। तदनभ्युपगमाच्चेति। सामान्यस्य यत्रासत्तिसत्तानभ्युपगमाच्चेत्यर्थः। ननु व्याप्तिग्रहे साध्यसाधनानेकाधिकरणतारूपतद्रूपभूयोदर्शनापेक्षत्वमेवास्तु सभिप्रायेणाशंका
निराकरोति न चेत्यादि। काकतालीयत्वशंकाशुद्धसाध्यसाध्यहेत्वोः एकाधिकरणमात्रदृष्टित्वशंकानिरासार्थं। द्वितीयादिदर्शनापेक्षा। साध्यसाधनोभयाधिकरणद्वयज्ञानापेक्षा। द्वि
तीयादिदर्शनापेक्षेति। साध्यसाधनोभयाधिकरणद्वयत्रयज्ञानापेक्षेत्यर्थः। शंकाकालादेवस्थ्यात् साध्ये हेत्वधिकरणान्तरवृत्तित्वशंकासंभवात् तथा चैतादृशशंकापि शनैस्तु सत्तया व्याप्तिग्रह
प्रतिबन्धकत्वेन नोपयुज्यत इत्यादि। व्याप्तिग्रहे निरुक्तभूयोदर्शनापेक्षेति भावः। ननु व्याप्तिग्रहे व्यभिचारोपाध्यभाववत्तानिर्णयो हेतुः। उपाध्यभाववत्तानिर्णयश्चोपाधित्वसंशयाभावाधीनः
भ्रमप्रयोजिकाभिः पक्षसंशये प्रति विशेषसंशयस्पृहे। तत्र यावद्घटपटादावुपाधित्वसंशये नोपाधिमत्तासंशयो भङ्गि काले उपाध्यभाववत्तानिर्णयो सम्भवति। साध्यसाधनोभयाधिकरण
पक्षेषु विशक्तिर्वृत्तित्वेन ज्ञाने घटपटादौ साध्यव्यापकत्वविशिष्टसाधनाव्यापकत्वरूपोपाधित्वसंशयानुत्पत्तेः अस्य साधनव्यापकत्वज्ञानात्कस्यचित्साध्याव्यापकत्वज्ञानाद्यनादृश

चिं·रघु·सट०
४२

ग्रहश्चेन साध्यसाधनाधिकरणव्यक्त्यन्तरस्थले विनासंभवतीति व्याप्तिग्रहे साध्यसाधनाधिकरणनानाव्यक्तिज्ञानरूपभूयोदर्शनोपयोग इत्यावश्यकीमाशंकते नन्विति। अनौपाधिकत्वाद्धिज्ञानं
उपाध्यभावश्च नानिर्णेयः। किञ्च साधनत्वमिष्टाकारकं तर्कं विनापि संभवतीत्यतो नानवस्थेत्यर्थः। अत्र धूमनिष्ठव्याप्तिग्रहस्यापि उपदर्शितव्याप्तिमूलकत्वस्याभिमानः। अनन्तरजनपान
यत्नजनकेष्टसाधनत्वानुमितिजनकव्याप्तिज्ञानस्य तर्कं विनासंभवेपि वह्निनिरूपितधूमनिष्ठव्याप्तिग्रहस्य तर्कं विनासंभवान्नत्रानवस्थापरिहारः। शंकते व्यभिचारशंकानिवर्तकत्वाद्व्यभिचा
रादिति। तर्कं विनापि व्याप्तिग्रहस्य संभवादित्यर्थः। सोपीति। तर्कोपीत्यर्थः। आपि नाभूयोदर्शनस्य सम्मुच्चयः। न व्याप्तिग्रहस्य हेतुः। ननु तर्कस्य व्याप्तिबुद्धौ वैजात्यमुपेत्य विजातीयग्रहसंप्र
त्ति तर्के हि तुर्यादि शंकितव्यभिचारस्य तत्राह न चेत्यादि। तद्बुद्धौ तर्कजन्यत्वेन व्याप्तिग्रहस्य वैजात्यान्तरं जातिरस्ति। तर्कानुत्तरोत्पन्नव्याप्तिग्रहस्य सत्वान्न जातिरस्ति। मानाभावादिति शेषः। तर्के
स्य चहेतुत्वासिद्धेरिति भावः। ननु मास्तु भूयः साध्यसहचारदर्शनं व्याप्तिग्रहस्य प्रयोजकं तथापि अनेकाधिकरणज्ञानलक्षणभूयोदर्शनं तु तथा स्यादित्यभिप्रायेणानेकाधिकरणवृत्तिरूपसा
मान्यत्वेन ज्ञाते सामान्ये सामान्यलक्षणप्रत्यासत्तिरितिव्यमाहाशंके तेन सामान्यप्रत्यासत्तिरिति। अनेकाधिकरणवृत्तित्वरूपसामान्यत्वेन ज्ञाते यत्सामान्ये प्रत्यासत्तेरित्यर्थः। सर्वोपसंहाराद्दिति। राम०
४२

सर्वसाध्यसाधनविषयकत्वमित्यर्थः। अविनाभावग्रहः। व्याप्तिग्रहः सामान्यरूपतयेति। अनेकाधिकरणवृत्तिजातेश्चेत्यर्थः। न सकृद्दर्शनगम्या। न एकाधिकरणज्ञानगम्या। इतीति। इति छले समर्थः।
भूयोदर्शनमपि स्यात्। अनेकाधिकरणज्ञानयेत्यत्र मुमुक्षायां समाधत्ते नेति। सामान्यस्य हीति। ज्ञानस्यैवाहि। ननु सामान्यतया वलने व्याप्तिज्ञाने हेतुरिति उपाध्यभाववत्त्वानिर्णयश्च उपाधित्वसं
शयाभावाधीनः इति शेषः। नन्वेतद्देशकालमात्रावच्छिन्नेनस्याहि। नन्वेतद्देशकालावच्छेदेन साध्यसाधनामयाधिकरणपङ्क्तिविषयकत्वे हि तज्जिखेनज्ञानानां घटादीनामित्यर्थः। उपाधिलक्षणकानिरासः। सा
ध्यव्यापकत्वविशिष्टस्य साधनाव्यापकत्वरूपोपाधिसंदेहकानिरासः। नन्वेवेति। तथाविधघटपटादीनां साध्याव्यापकत्वज्ञाने साधनव्यापकत्वज्ञाने चेत्यर्थः। भूयोदर्शनं विनानेति। साध्यसाधनाधिक
रणानेकव्यक्तिज्ञानं विना न भवतीत्यर्थः। घटादेः साध्याधिकरणत्वं तेनाभावप्रतियोगित्वादिरूपेण त्वव्यापकत्वादिज्ञानं घटानधिकरणसाध्याधिकरणज्ञाने विना न संभवति विशेषबुद्धौ विशेषण
ज्ञानस्य हेतुत्वादिति तत्र तद्भावरूपकमिति भावः। अनुमानाधीनत्वेनेति। व्याप्तिज्ञानाधीनानुमितिविषयत्वेनेत्यर्थः। अनवस्थापातमाहित्यर्थः। तथा चानवस्थादोषेण व्याप्तिग्रहं प्रति उपाध्यभाववत्त्वानि
र्णयो न हेतुरिति उपदर्शितरीत्यापि व्याप्तिग्रहे निरूढभूयोदर्शनोपेक्षेति भावः। अनवस्थाभिया व्याप्तिग्रहं प्रति उपाध्यभाववत्त्वानिर्णयस्य हेतुत्वेऽपि उपाधित्वज्ञानाभावस्य तत्प्रयोजकत्वमावश्यके

मु॰टी॰
४३
43

अन्यथासत्त्वसंशयकाले व्याप्तिग्रहापत्तेः न यावत्तया विपक्षसंशयनिरासकत्वेनोपदर्शितत्वात् सा निरुक्तभूयोदर्शनस्य तत्रापि स्वाश्रयावच्छेदकीभावाश्रयत्वेनान्वयेति। धर्मान्तराणां घटादीनां। अत इति।
व्याप्तिग्रहप्रयोजकमिति शेषः। तेषामित्यादि। तथाविधघटादीनामुपाधित्वसंशयाभावरूपमर्थः। भूयोदर्शनाधीनेति। उपदर्शितभूयोदर्शनाधीनेत्यर्थः। तदर्थे। न तेषां पक्षसाध्याव्यापकत्वादिज्ञाना
र्थं। भूयोदर्शनापेक्षा। निरुक्तभूयोदर्शनापेक्षा। अत एवेति भूयोदर्शनस्य व्याप्तिग्रहप्रयोजकोपाधित्वसंशयाभावप्रयोजकत्वादेवेत्यर्थः। दर्शने। न। निरुक्तभूयोदर्शनेन। तन्निश्चयप्रद इति। त
स्योपाधित्वस्य निश्चयो यस्मादिति बुसमा। उपाधित्वसंशयाभावरूपमर्थः। यथाश्रुते उपाधित्वनिश्चयस्य व्याप्तिग्रहप्रयोजकत्वेनानुक्ततया तत्कथनेनासंगत्यापत्तेः। हेतुरिति। व्याप्तिग्रहप्रयोजक
मित्यर्थः। नवा रसंख्यानियमः। नहि किं भूयोदर्शनमिति प्रश्नावसरः। नवाननुगमः। नवा भूयस्त्वस्य त्रित्वचतुष्ट्वादिरूपत्वे नानुगततया व्याप्तिग्रहप्रयोजकतावच्छेदकत्वासंभवदोषः। तथा चोपाधि
त्वसंशयानुमारस्य प्रयोजकदर्शनत्वेनैव भूयोदर्शनानां व्याप्तिग्रहप्रयोजकत्वाभ्युपगम इति भावः। सर्वमिदं संभवति उपाधित्वसंशयाभावस्य व्याप्तिग्रहप्रयोजकत्वे अन्यतरस्यैवोपयाद् इति। यद्य
पीत्यादि। अन्यस्येति। अन्यमतिपेत्यर्थः। नास्य व्याप्तिग्रहप्रतिबंधकत्वमिति। नाम्यनि यव्याप्तिग्रहं प्रतिसाक्षात्। प्रतिबंधकत्वमर्थः (प्रतिबंधक) मानाभावादिति शेषः। तद्वाहितेति। उपाधित्वसंश राम॰ ४३

याधीनोपाधित्वसंशयजन्मेत्यर्थः। प्रतिबंधक। व्याप्तिग्रहस्य प्रतिबंधकं तद्विघटनमिति। उपाधित्वसंशयनिरासइत्यर्थः। तथाच व्याप्तिग्रहप्रतिबंधकव्यभिचारसंशयाभावसं
पादकत्वात्स्वभावस्यतत्प्रयोजकतावच्छेदकरूपकेतिभावः। अयोग्योपाधिसंशयाधीनेति। अयोग्योपाधिव्याप्तिज्ञानेहेतुरिति उपाध्यभाववत्तानिर्णयस्य उपाधित्वसंशयाधीनः
इतिशेषः। ननु इदं कालमात्रावच्छिन्नेत्यादि। ननु इदं कालावच्छेदेन साध्यसाधनोभयाधिकरणयत्किंचिद्व्यक्तिज्ञानत्वेन ज्ञानानां घटादीनामित्यर्थः। उपाधिशंकानिरासः। साध्यव्या
पकत्वविशिष्टसाधनाव्यापकत्वज्ञानं साधनव्यापकत्वज्ञानंचेत्यर्थः। भूयोदर्शनं विनानेति। साध्यसाधनाधिकरणानेकव्यक्तिज्ञानं चेत्यर्थः। घटादौ साध्याधिकरणत्वसंसर्गेताभावप्रति
योगित्वादिरूपतद्व्यापकत्वादिज्ञानं घटानधिकरणसाध्याधिकरणज्ञानं विनासंभवति विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वादिति तत्र तदावश्यकमिति भावः। अनुमानाधीनत्वे
चेति। व्याप्तिज्ञानाधीनानुमितिः। धिमायोग्योपाधिसंशयजन्मेत्यर्थः। तथापीति। योग्यपक्षेऽसाध्याव्यापकत्वादिज्ञानेनोपाधित्वसंशयानुदयेन तदधीनयोग्योपाधिसंशयोच्छेदेपीत्यर्थः
अनुच्छेदात्। उच्छेदासंभवात्। सचेति। अयोग्यपक्षेउपाधित्वसंशयाभावश्चेत्यर्थः। नभयोर्दर्शनात्। ननिरुक्तभयोर्दर्शनजन्यसाध्याव्यापकत्वादिग्रहस्य स्यात्। नाप्यनुमानात्। नवासाध्याया

पक्षत्वादेरनुमानाद्युच्छित्तिप्रसङ्ग इति दोषः इत्युक्तमिति। अनवस्थायास्तादृग्वैपरीत्येन उक्तप्रायमिति स्वर्थः। अयं भावः। अधिकरणस्यापि योग्यतया साध्याव्यापकत्वादिग्रहस्य सुतरामनुदयोऽनत्रानवस्थाभि
यासाध्याव्यापकत्वादेरनुमानस्याप्यसंभवेन सर्वत्रापि गम्यव्यक्तौ उपाधित्वसंशयोच्छेदासंभवात्। व्याप्तिग्रहे प्रति उपाधित्वसंशयाभावस्यापेक्षणे तत्कृतैवका पि व्याप्तिग्रहो ऽशक्य इति व्याप्तिग्रहं प्रति उ
पाधित्वसंशयाधीनव्याप्तिवाशङ्का शङ्कापिशाचीनुल्मतयानमगिति बोधिकाऽऽस्युपपत्त्याद्यनोपदर्शितेत्याशयः। रीत्या भूयोदर्शनादेयैव्याप्तिग्राहकत्वे इति॥ संस्कारद्वारा भूयःसहचारदर्शन
स्य भूयोदर्शनस्य व्याप्तिग्रहहेतुत्वे पूर्वं दृष्टेऽपि सिंहगुहावलोकनमात्रेण तत्र तद्रूपवर्णनान्तरमाह। अपि चेति। भूयोदर्शनजन्यसंस्कारी भूयः सहचारदर्शनजन्यसंस्कारः। नबहिरिन्द्रियमात्रस
हकारी मन बहिरिन्द्रियसंनिकर्षमात्रसहकारेण फलजनक इति यावत्। न घ्राणादिकं विनापि। बहिरिन्द्रियसंनिकर्षं विनापि। सहचाराद्रिहितानन्तः। सहचारादिहितानलक्षणाप्रसाससञ्जितः व्याप्तिग्रह
नात् मनःसंनिकर्षेण व्याप्तिग्रहजननात्। नापि मन इति। भूयोदर्शनजन्यसंस्कारः नत्वन्यस्मरणं वा सहकारि नित्यदोषः। प्रमाणान्तरतापत्तेरिति। अत्र प्रमाणान्तरत्वस्य च प्रमाणा॰ चतुष्
यातिरिक्तप्रमाणत्वार्थकत्वे ऽप्रसिद्धापत्त्या प्रमितिकरणत्वापत्तेरित्यर्थः। परस्साधारणे सहकार्यसाध्यमनोबहिरिन्द्रियाग्रामं जनयतीतरेव प्रमाणान्तरमिति निजमादिति दोषः तस्यावश्यकत्वात् इति

शेषेण भूयोदर्शनजन्यसंस्कारस्य व्याप्तिग्राहकज्ञानकत्वासंभवेन संस्काराद्वारापि भूयोदर्शनं न हेतुः तज्जन्यत्वे सति तज्जन्यजनकस्यैव द्वारत्वादिति भावः। उपसंहारव्याजेन प्राभाकरः स्वमते व्याप्तिग्रहो
पायं प्रदर्शयति न स्मारितेति। व्याप्तिप्रत्यक्षं प्रति भूयोदर्शनस्य हेतुत्वासंभवादित्यर्थः। परिशेषेणेति। यद्यप्यत्र परिशेषेण स्वप्रत्यक्षात्मकज्ञानकभूयःसहचारदर्शनिकत्वे सति सहचारदर्शनजन्यप्र
त्यक्षविषयत्वं प्राभाकरमते सहचारदर्शनस्यैव व्याप्तिप्रत्यक्षात्मकज्ञानं यावि विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया व्याप्तेः सहचारदर्शनजन्यप्रत्यक्षाविषयत्वेन स्वरूपासिद्ध्यापत्तेः
न चापि साध्यसाधनसहचारग्राहकसामग्रीत्वव्यापकत्वग्राहकसामग्रीत्वरूपत्वमेवात्र परिशेषबोधः सकृद्दर्शनगम्येति। यद्यप्यत्र सकृद्दर्शनगम्यत्वं न प्रत्यक्षसहचारदर्शनजन्यप्रत्यक्षवि
षयत्वं प्राभाकरमते उपदर्शितरीत्या बाधायत्तेः न चापि साध्यसाधनसहचारज्ञानत्वव्यापकविषयितानिरूपकत्वमेवात्र सकृद्दर्शनगम्यत्वपदार्थो बोध्यः। सा। व्याप्तिः। तथा च व्याप्तिः साध्य
साधनसहचारज्ञानत्वव्यापकविषयतानिरूपिका साध्यसाधनसहचारग्राहकसामग्रीत्वव्यापकत्वग्राहकसामग्रीत्वकत्वादित्यनुमानात् साध्यसाधनसहचारविषयकयावज्ज्ञाने व्याप्तिविष
यकत्वे सिद्धे साध्यसाधनसहचारग्राहिका सामग्री व्याप्तिग्राहिका व्याप्तिविषयकज्ञानसामग्रीत्वादित्यनुमानात् साध्यसाधनसहचारग्राहकसामग्र्येव व्याप्तिग्राहिकेति भावः। व्याप्तेः सा

ध्यसाधनसहचारविषयकयावज्ज्ञानविषयत्वमुपपादयति तथाहीत्यादि। केवलाधिकरणं। अधिकरणस्वरूपत्वं। अधिकरणातिरिक्तो न भवतीति यावत्। ननु तदभावस्याकरणस्वरूपत्वे अभेदेनाधाराधेयभावानुपपत्तिरित्यत आह। तत्कालसंबंधो वेति। अधिकरणेन सहमतियोगवनधिकरणकालस्यैककालीनत्वादिसंबंधो वेत्यर्थः। न त्वभावविषयकप्रतीतेः सर्वस्याः कालविषयकत्वमनुभवविरुद्धमिति तथाविधसंबंधः उपाध्यभावपदार्थः इत्यत आह स्वप्रकाशरूप इत्यादि। स्वप्रकाशस्वरूपमधिकरणविषयकं तत्तज्ज्ञानविशेष्यतासंबंधेनाधिकरणसंबद्धं मुपाध्यभावपदार्थ इत्यर्थः। तज्ज्ञेति। निरुक्तोपाध्यभावस्वरूपं चेत्यर्थः। प्रथमेत्यादि। वस्तुतादिनाप्रथमसंबंधस्यनेच स्फुरादिजन्यसाध्यसहचारविषयकत्वानेःस्वगतमेवाविषयीभूतमेवा ननु अधिकरणादेः सप्तमपदार्थमात्रस्य भावत्वानधिकरणतयोपाध्यभावस्वरूपत्वमसंभवदुक्तिकं भिमधिकत्वादभावोपाध्यः तथा चोपदर्शितानुमाने बाधादित्यत आह न चेत्यादि। अधिकः। सप्तमपदार्थस्य। तदभावः। अभावत्वाश्रयोऽभावः। अस्तिप्रामाणिकोक्तं। प्राभाकरमते अभावमात्रस्यैवाधिकरणस्वरूपत्वादिति शेषः। तथा च प्राभाकरमते अभावस्यापि भावमात्रत्वेन तथा नोक्तानुपपत्तिरिति भावः। तत्र याप्यभावस्याधिकरणादिरूपत्वेऽपि प्रकृतानुमाने बाधादिरस्त्येवाभावबुद्धेः प्रतियोगिज्ञानहेतुतया पाधितानं विना सर्वत्र सहचारग्रहे उपाध्यभावरूपवाधिभाना

संभवादित्यत आह न चेति न हीत्यर्थः। अधिकरणादिज्ञाने अधिकरणादिस्वरूपाभावस्याधिकरणतावच्छेदकरूपेण ज्ञाने। तन्न स्यात्। सर्वत्र सहचारग्रहेऽधिकरणस्वरूपयोपाध्यभावभानेनेत्स्या
न्न न यावद्व्यक्तियोगिज्ञानस्य कार्यतावच्छेदकं नाभावज्ञानत्वं मात्रे इदं ज्ञादिना। भावप्रत्यक्षे व्यभिचारात्। अपि तु अभावत्वप्रकारकप्रत्यक्षत्वं तच्चेति नोपाधिज्ञानं विना सहचारज्ञानमात्रेऽधिक
रणतावच्छेदकरूपेणोपाध्यभावरूपव्याप्तिमानानुपपत्तिरिति भावः। एवं च। उपाधिज्ञानं विनापि अधिकरणतावच्छेदकरूपेणाधिकरणाद्यात्मकोपाध्यभावरूपव्याप्तिज्ञाने बाधकाभावे चेत्यर्थः।
उपाध्यभावे इति यावत्। सहचारज्ञाने जायमाने इत्यादि। न चाच सहचारविषयक यावत्ज्ञाने जायमाने उपाध्यभावरूपव्याप्तिज्ञाने व्यक्तिव्याप्तिस्तत्र नानुपपत्तिरित्यर्थः। अतः प्रकृतानुमानेन बाधि
विशेषः इति शेषः। उपाधिज्ञानं विना साधनतावच्छेदकरूपेणोपाध्यभावरूपसाधनेनाप्यनौपाधिकत्वस्यात्रोपाध्यभावव्यवहारापत्तिः तदानीमपि तज्ज्ञानेऽस्योपाध्यभावरूपव्यवहर्तव्यज्ञानस्याविघ्रमा
नत्वादित्यत आह उपाध्यभावव्यवहारेत्यादि। यद्यपीति। न हि रूपमपेक्षन्ते। उपाधित्वप्रकारकोपाधिज्ञानमपेक्षन्ते। दीर्घत्वव्यवहारे इत्यादि। यथा। बाधिज्ञानं विना दीर्घत्वरूपपरिमाणप्रत्यक्षे ज्ञाते
पि अपमत्वादि घटेति व्यवहारे अवधिज्ञानापेक्षा। न चोपाधिज्ञानं विनोपाध्यभावरूपव्याप्तिज्ञाने ज्ञातेपि अत्रोपाध्यभाव इति व्यवहारे उपाधिज्ञानापेक्षा आवश्यकीति यथाविधव्यवहारं प्रति उपाध्य

मु॰ टी॰
५६
46

भावत्वप्रकारकज्ञानस्यैव हेतुतया उपाधिज्ञानं विना तज्ज्ञानकत्वाविधज्ञानासंभव इति भावः। एवं साध्यसाधनसहचारज्ञानस्योपाध्यभावस्य व्याप्तिज्ञानत्वाभ्युपगमे रासभसंबंधतुल्येनिरासभनिष्ठ
वह्निसामानाधिकरण्यज्ञानवदनुमित्युपजनकत्वर्थः। संबंधत्वानादिति। सहचारज्ञानादित्यर्थः। तादृशज्ञाने यथांशे उपाध्यभावस्य धर्मस्य तादात्म्यसंबंधेन भानेबाधकाभावात् तदंशे व्याप्तिप्रकार
कहेतुज्ञानसत्त्वेनानुमित्यापत्तिरुचितैवेति भावः। उपाधिस्मरणेऽपीति। उपाधिज्ञानकालीनसदुपाधिनव्याप्येतरप्रकृतसाधनविशेष्यकोपाधिमत्त्वप्रकारकसामग्रीकालीनसत्त्वयदुपाध्युपलंभाभाव
विशिष्टोपाध्यभावस्याधिकरणादिज्ञानं तस्यैवानुमितिप्रति हेतुत्वाभ्युपगमादित्यर्थः। मन्वेवं सति अनीन्द्रियहेतुकानुमितिर्न स्यात् अहेतोरयोग्यतयानद्विशेष्यकोपाधिमत्त्वज्ञानासंभवेन तद्घटितनिरुक्ता
नुमितिकारणासंभवादित्यत आह न व्यवहारहेतुत्वाच्चेति। न व्यवहारहेतुरेव हेतुर्यत्रेति मध्यमपदलोपिसमासात् अनुमितेरुपाध्यभावव्यवहारहेतूपाध्यभावत्वप्रकारकहेतुकत्वादित्यर्थः। चकारोऽन्वा
कारार्थपूर्वकत्वात्स्वरसमसूचकः। तथा चानुमितिं प्रति न केवलमधिकरणादिरूपोपाध्यभावज्ञानं कारणं येनोपदर्शितापत्तिः स्यात् अपि तु उपाध्यभावत्वप्रकारकज्ञानं तथा च न तत्रानुपपत्तिगंधो
पीतिभावः। एवमिति। साध्यसाधनसंबंधग्राहकस्यैव व्याप्तिग्राहकत्वाभ्युपगमे इत्यर्थः। अयमहत्त्वेनेदर्शनात्सर्वमनोधर्मेंद्रियसंनिकर्षादिनेतियावत्। विशिष्टबुद्धिं प्रति विशेषणज्ञानहेतुत्व राम॰
५६

मनभ्युपगन्तॄणां व्याप्यभावकरणां साध्यसाधनसहचारज्ञानकाले इति शेषः व्याप्तिनिश्चयात्। व्याप्तिप्रकारकनिश्चयसंभवात्। विशेषदर्शनेनिश्चयत्वादिति। धूमे वह्निव्याप्तिप्रकारकनिर्णये सत्योम

र्थः। रासभादिसंशयवदिति। रासभादिसंशयवदनुभवसिद्धो यो व्याप्यत्वसंशयः सन्नस्तीत्यर्थः तदानीं तत्प्रतिबंधकव्याप्तिप्रकारकनिर्णयसत्त्वादिति भावः। उपाध्यभावत्वप्रकारकसाध्य

साधनसहचारज्ञानानंतरं व्याप्तेः संशयाभाव उपपाद्यते तत्प्रकारकज्ञानत्वाविच्छिन्नज्ञानानंतरं तत्राद्येम अथ्यायेन समाधानमाह व्याप्तिस्मरणानंतरमित्यादि। अत्र स्मृतित्वमविवक्षितं तत्तद्यावोपाध्य

भावत्वप्रकारकव्याप्तिज्ञानानंतरमित्यर्थः। विद्यमानत्वस्याभावत्वेन साधनत्वेन ज्ञायमाने अभावे इत्यर्थः। एवकारस्तु व्याप्तिज्ञानानंतरमित्यत्र योज्यः। उपाधेर्नज्ञातत्वस्य स्वप्रतियोगिज्ञा

संबंधेनोपाधिर्नन्निर्णीत इत्यर्थः इति शंकायेत्यस्या इति कृत्वा विद्यमानायां शंकायामव्याप्तिरित्यर्थः। तथा च यावदभावत्वेन साधनवृत्तित्वेन ज्ञायमानेऽभावे प्रतियोगिता संबंधेन उपाधित्वेनोपाधिमप्र

नानिर्णीतिरित्युक्त्वा विद्यमाने शंकास्यामप्यायां व्याप्तिसंशयः सः उपाध्यभावत्वप्रकारकनिरुक्तव्याप्तिज्ञानानंतरमेव किं निवर्त्तते इति व्याप्तिस्मरणे सारूप्यसंशयरत्वस्यापि वसेयः। तथा चो

पाध्यभावत्वप्रकारकनिर्णयस्य व्याप्तिसंशयप्रतिबंधकत्वं यावत्प्रकारकत्वाविच्छिन्नत्वानां तरं व्याप्तिसंशये बाधकाभावे न तदा व्याप्तिसंशयाभावोपपादनमशक्यमिति भावः। अत्रेदं समा

धानमाह। व्याप्तेरिति। व्याप्तिसंशये प्रति उपाध्यभावत्वप्रकारकज्ञानस्य प्रतिबंधकत्वादेवेत्यर्थः। उपाधिनिरासद्वारेति। उपाध्यभावत्वप्रकारकनिर्णयद्वारेत्यर्थः। अपनीयत इति। प्रतिबध्यते। न व्याप्यो
पाध्यभावत्वप्रकारकतथाविधज्ञानानंतरं व्याप्तिसंशयाभावापादने शापनेरिति भावः। उपाध्यभावत्वप्रकारकज्ञानानंतरमपि व्याप्तिसंशयस्य कदाचिदुपलभ्यत्वेनानुपपादयन्ति। यद्वेति।
प्रामाण्यसंशयात्। उपाध्यभावत्वप्रकारकज्ञाने प्रामाण्यसंशयात्। ननु तत्रोपाध्यभावत्वप्रकारकज्ञानानुकल्पनेनैव सामंजस्ये यत्पर्यंतत्वोल्लसनत्वप्रामाण्यसंशयकल्पनेनेत्यत आह यद्वे
त्यादि। प्रथमदर्शनेन। प्रथमोत्पन्नउपाधित्वप्रकारकज्ञानेन। निश्चितत्वात्। उपाध्यभावत्वेन निश्चितत्वात्। व्याप्तिग्राहकांतरस्याभावात् उपाध्यभावत्वप्रकारकज्ञानातिरिक्तस्योपाध्यभावत्वप्र
कारकव्याप्तिग्राहकस्याभावात्। परिशेषेण। उपाध्यभावत्वप्रकारकज्ञानेन। सहकृत इति। निगृहीतत्वात्। प्रथमोत्पन्ननिश्चयविषयपक्षे बाधकाभावात्। तन्निश्चयपर इति। उपाध्यभावत्वप्रकारकनिश्चयपरेत्य
र्थः। न तत्संशयपर इति। व्याप्तिसंशयपर इत्यर्थः। एवं। तत्र साध्यसहचारग्राहकस्यैव तत्र विषयव्याप्तिग्राहकत्वे। प्रथमे। साध्यादिसंनिकर्षानंतरं। व्याप्तिनिर्णयः स्यादिति। व्याप्तिप्रमा स्यादित्यर्थः। तत्रे
ति। रासभेत्यर्थः। न तत्संनिकर्षमात्रान्मतमत आह प्रत्यक्षस्येति। प्रत्यक्षसामग्र्या इत्यर्थः। विषयस्येति। विशेष्यत्वेति विरोधितास्येत्यर्थः। इदं तु नैयायिकमतमवलंब्योक्तं मीमांसकमते तु प्रमाप्रमा

णजन्यत्वाभावेन तथात्वे संभवद्वृत्तिकत्वान्न वस्तुतस्तु प्रमायाङ्गुणजन्यत्वाभावेऽपि नानुपपत्तिः फलबले न धूमादिरूपव्याप्यनिष्ठसाध्यसाधनसहचारग्राहकस्यैव व्याप्तिग्राहकत्वाभ्युपग
मादिति दिक्। ननु रासभे वह्निव्याप्यत्वं हेत्वचित्र रासभे वह्निव्याप्यत्वव्यवहारस्य सर्वानुभवसिद्धत्वात् तत्र तत्त्वप्रसंगः व्यवहारे व्यवहर्तव्यप्रकारकज्ञानस्य हेतुत्वादित्यत आह क्वचिदित्यादि। दोषमा
हात्म्यात्। क्वचित् रासभे ज्ञानवह्निव्याप्येः संसर्गाग्रहात् न वह्निव्याप्यत्वव्यवहारः स्यात् परं तु यथा व्यवहारं प्रति व्यवहर्तव्यसंसर्गाग्रहस्यैव हेतुत्वाभ्युपगमान्नानुपपत्तिरिति भावः। ननु सर्वत्र रासभ
एव कुतो न तथाविधासंसर्गाग्रहः स्यात् तत्राह न चात्रापीत्यादि। अत्रापि सर्वत्र रासभेऽपि। तथा। व्याप्ये संसर्गाग्रहः। आरोपे सति निमित्तानुसरणं। असंसर्गाग्रहादिरूपारोपे प्रामाणिकैरवस्यमु
पगमार्थं तन्निमित्तकारणस्य दोषस्य कल्पनं। ननु निमित्तमस्तीत्याशयः। ननु सर्वत्र दोषरूपनिमित्तकारणं कल्पयित्वा संसर्गाग्रहादिरूपारोपः कल्प्यतामित्यत आह इत्यभ्युपगमादित्यस्य। सकलप्रामाणि
कसंमतत्वात्। न चाच सर्वत्र रासभे दोषरूपनिमित्ताभावादेव न तथाविधासंसर्गाग्रह इति भावः। मीमांसकमते उपाध्यायरूपव्याप्तेर्निरुक्तसद्धेतुनिगम्यत्वमुपपाद्य हेतुसमानाधिकरणोत्य
न्ताव्याप्तेर्निरुक्तसद्धेतुनिगम्यत्वं टीकाकारोक्तं दूषयितुं तन्मतमुपन्यस्यति। केचिदित्यादि। तदुभयमपि। उपदर्शितोभयव्याप्तिस्वरूपमपि। मतस्थैर्येणेति। प्रसङ्गाभिन्नेनेत्यर्थः। अवगतमेव।

मु॰टी॰
४८
48

विषयीभूतमेव। अधिकरणस्वरूपस्य तथाविधप्रतियोगित्वाभावस्य तदधिकरणसाध्यग्रहकालेऽग्रहे बाधकाभावादिति भावः। ननु साधनसामानाधिकरण्यग्रहकाले तथाविधव्याप्ति-
ग्रहे किंप्रमाणमित्यत आह। महानसइति। एतद्धूमाधिकरणे इत्यर्थः। अवगतइति स्वरूपकीर्तनं। इत्यनुभवात्। साध्यसाधनसहचारग्रहकाले इति ज्ञानस्यानुभवबलादेव तथास्वीकार इति भावः।
ननु साध्यसामानाधिकरण्यग्राहकस्यैव न तथाविधव्याप्तिग्राहकत्वे साध्यसामानाधिकरण्यग्रहकालेऽपि तथाविधव्याप्तिग्रहः स्यादित्यत आह। असमइत्यादि। तथानुभवेऽपि तथाविधप्रतियोगि-
त्वग्रहसंभवेऽपि। अग्रे। धूमाधिकरणे तत्समभाभावग्रहोत्तरं। सः। तथाविधप्रतियोगित्वाग्रहः बाध्यते। अप्रामाण्यत्वेन गृहीतेन तथा च तत्र व्याप्तिग्रहेऽपि न क्षतिस्तत्राप्रामाण्यज्ञानानास्कन्दितत्वादिति
ति भावः। एवमिति। साध्यसाधनसहचारग्रहविषयीभूततद्धूमाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वादिकमित्यर्थः। तद्दहनत्वादिना तद्वह्निनिरूपिततद्धूमनिष्ठव्याप्तिघटकं भवतीत्यर्थः। न वह्नित्वादि
। ननु वह्नित्वावच्छिन्ननिरूपितधूमत्वावच्छिन्नविषयव्याप्तिघटकमित्यर्थः। तथा च साध्यसाधनसहचारग्रहकाले तद्वह्निनिरूपिततद्धूमनिष्ठव्याप्तिग्रहेऽपि धूमत्वावच्छिन्ननिष्ठवह्नित्वावच्छिन्ननिरूपि-
तव्याप्तिग्रहासंभव इति भावः। नन्वेतेन ग्रन्थेन किमायातमित्यत आह नेवेति। तदनुमानोपयोगी। तद्धूमनिष्ठतद्वह्निनिरूपितव्याप्तिस्वरूपं धूमत्वावच्छिन्नहेतुकवह्नित्वावच्छिन्नसाध्यकानु- राम॰ ४८

मितिप्रयोजकं। तथा च तथाविधानुमितिप्रयोजकव्याप्तिग्रहस्यैव प्रकृते उपयोगात् तदनुपपादनेनोद्देश्यासिद्धेरिति भावः। ननु साध्यसाधनसामानाधिकरण्यग्रहकाले तथाविधव्याप्ति
रेव गृह्यते अतो नानुपपत्तिरत आह वह्नित्वमित्यादि। न प्रतियोगितावच्छेदकं। न हेत्वधिकरणवृत्त्यत्यन्ताभावीयप्रतियोगितावच्छेदकं। प्रथमतः साध्यसामानाधिकरण्यग्राहकानां अशक्यमे
वेति। विप्रकर्षादिना प्रतियोगिसत्त्वप्रसंजितप्रतियोग्युपलंभप्रतियोगीतरयोग्यत्वविशिष्टप्रतियोग्युपलंभाभावरूपयोग्यानुपलब्धेः तथाविधप्रतियोगितावच्छेदकत्वाभावस्याहिकायाः असं
भवादिति भावः। न स्यात् साध्यसाधनसंबंधग्राहकाले उपाध्यभावरूपव्याप्तिरेव गृह्यते न त्वन्यविधापीति सा निष्कृष्य मीमांसकमते नैयायिको दूषयतीत्येवमिति। साधनत्वाभिमतेन सममित्यादि।
साधनाभिमतहेतुत्ति यत् साध्यसामानाधिकरण्यं तदवच्छेदकं यद्विशेषणं उपाधिरिति सर्वथः। अत्र स्वरूपसंबंधरूपावच्छेदकत्वं सामानाधिकरण्यसंबंधेन वाच्यं। उपाधिरपि सामानाधिकरण्यसंबंधावच्छि
न्नसाधननिष्ठसाध्यसंबंधितानिरूपितस्व[illegible]पसंबंधावच्छिन्नावच्छेदकतावान् भवतीति अतएव वस्तुस्वरूपव्यवस्थापितमिति नानुपपत्तिः। विशेषणत्वमत्र साधनवृत्तित्वे सति व्यावर्त्तकत्वं साधनाव्यापक
त्वमिति यावत्। अतो न संकीर्णो साध्याद्यव्युपाधिलक्षणातिव्याप्तिः। नन्वनेनैव हेतुहेतोर्नोपाधिरतो नानुपपत्तिः। संबंधितायां साधननिष्ठत्वाकीर्त्तनं तु साधननिष्ठसाध्यसामानाधिकरण्य

मु॰टी॰ ५९ 59

णपसंबंधावच्छिन्नसाध्यसंबंधितावच्छेदकरूपत्वाभावमतो नैवयर्थ्यमिति। सिध्यसिद्धिव्याप्तिमिति। प्रसिध्यप्रसिद्धिव्याप्तिरित्यर्थः। निषेधस्तूपपन्नेरिति तथाविधोपाध्यभावाप्रसिद्धेरित्यर्थः। तथ्याव
न्तथाविधोपाध्यभावस्य व्याप्तित्वे व्याप्तिलक्षणेऽसंभवइति भावः। यावदिति। एतदर्थस्तु व्याप्तिवादे सिद्धान्तेऽठ ज्ञेयः। प्रथममिति। साध्यसाधनसामग्रीग्राहकयावत्सामग्रीतदर्थः। नह्यु
टकीभूततया विधप्रमितिवादिसिद्धिमात्सकसामग्र्याश्रयितत्वाऽन्वयेऽपि मत्त्वादिति। दोषः। तथाच यावत्साध्यसाधनसंबंधग्राहकोपायएव व्याप्तिग्राहोपायइत्युक्तिरसंभवदुक्तिकैवेति भावः। प्रका
रान्तरेणोक्तमीमांसकमतं दूषयति किंचेत्यादि। वस्तुगत्या। व्याप्तिस्वप्रकारकं तज्ज्ञेति। व्याप्तित्वं चेत्यर्थः। विशेषणज्ञानसाध्यत्वादित्यादि। प्रतियोगिज्ञानजन्यत्वात्प्रतियोगिविशेषिताभावत्ववि
शिष्टबुद्धेरित्यर्थः। नियमत इति। यावत्साध्यसाधनसंबंधग्रहपूर्वमित्यर्थः। तथाच येनरूपेणरूपेण व्याप्तिज्ञानं कारणं तेन रूपेण तद्ग्रहोपायो वाच्यः। तस्यैवाकांक्षितत्वादिति एवं च प्रकारान्तरेण
व्याप्तिग्रहोपायप्रतिपादनेऽर्थान्तरमिति भावः। नन्विदं तदैव संभवति यदि व्याप्तित्वेनैव व्याप्तिज्ञानं मनुमितिकारणमिति कारणमिति स्यात्तदेव न अपितु साधनतावच्छेदकरूपेणतज्ज्ञानं तथा दृश्य
तस्तद्दूषयति। यद्वेक्तमित्यादिना। तदभावः। उपाध्यभावः। उपाधिज्ञानं विनापीति। उपाधिज्ञानाधीनोपाध्यभावत्वप्रकारकज्ञानं विनापीत्यर्थः। नंचैवमिति। नचैवापत्तिरित्यर्थः। अनुभववि राम॰ ५९

रोधादिति शेषः। यावत्साध्यसाधनसहचारं नियमत उपाधिकल्पनेन तत्र उपाध्यभावग्रहरूपेणोपाध्यभावग्रहसंभवात् पूर्वोक्तदोषद्वयमनोद्देयांतरमाह वस्तुतस्त्वित्यादि नासाधारणधर्मदर्शिनाम्। सा
धारणधर्मज्ञानाभावात्। तथाविधसाधारणधर्मस्यापि यावत्साध्यसाधनसंबंधस्य मम ज्ञातमज्ञातं वा सर्वस्मरणसंभवादिति भावः। न प्रथमदर्शनेन। यावत्साध्यसाधनसंबंधग्रहेण। अत्राभि
हितनीया। अन्यथा। निश्चयं प्रतिव्याप्यत्वसंशयस्य प्रतिबंधकत्वे। निश्चयो न स्यात्। अनुमित्यात्मकं शाब्दबोधात्मकं च ज्ञानं न स्यात्। इष्टत्वे एवमिति। साधारणधर्मज्ञानविधयेत्यर्थः। भूयो दर्शि
नमपि। भूयः साध्यसाधनसहचारज्ञानमपि। संशायकं। व्यभिचारसंशयसामग्रीति यावत्। अन्यमते भूयःसहचारदर्शनात्मकं यं व्याप्तिनिश्चयं तत्प्रति प्रतिबंधिकायाः व्यभिचारसंशयसामग्र्याः सत्त्वा
सत्त्वादिति भावः॥ ॥इति व्याप्तिग्रहोपायपूर्वपक्षनिष्कर्षः॥ ॥सिद्धांतयति॥ ७॥ अत्रोच्यत इति। व्यभिचारेत्यादि। सहचारः। साधननिष्ठसाध्यनिरूपितसामानाधिकरण्यं तथा च व्यभिचार
ज्ञानाभावो हेतुर्निष्ठसाध्यसामानाधिकरण्यज्ञाने च व्याप्तिग्रहे हेतुरिति भावः। अत्रेदं बोध्यं। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरण
निष्ठमत्वादिकं व्याप्तिः। तथाविधसामानाधिकरण्यस्य असंभवादिसाधारण्यात्। तथा च साध्यतावच्छेदकेन तथाविधप्रतियोगितानवच्छेदकत्वं ग्राह्यं साध्यतावच्छेदके तथाविधप्रतियोगितानवच्छे

वि॰ रघु॰ सहः
५०
50

कत्वरूपव्यभिचारग्रहाभावोविपरीतज्ञानाभाववद्विषयोहेतुः साध्यसमानाधिकरणत्वंवह्निधूमसामान्येइतिशेषःपक्षज्ञानविधयासाध्यसामानाधिकरण्यज्ञानंहेतुरित्येवंरीत्यासर्वत्रव्या
भिचारग्रहेतथाविधोभयंहेतुरिति।ननुकोटिद्वयावच्छिन्नव्यभिचारज्ञाननिष्ठप्रतियोगिताकाभावोव्यभिचारग्रहहेतुःनतावच्छिन्ननिर्णयत्वावच्छिन्नप्रतियोगिताकाभावस्तथाव्यभिचारसंदेह
कालेव्यभिचारग्रहापत्तेः नापिव्यभिचारसंदेहत्वावच्छिन्नप्रतियोगिताकाभावस्तथा।व्यभिचारनिर्णयकालेव्यभिचारग्रहापत्तेरतआहज्ञानमिति।व्यभिचारग्रहकारणीभूताभावप्रतियोगित्वाभि
चारज्ञानमित्यर्थः तथाचसंशयनिश्चयसाधारणव्यभिचारज्ञानत्वावच्छिन्नप्रतियोगिताकाभावस्यव्यभिचारग्रहहेतुत्वान्नोक्तानुपपत्तिरितिभावः। क्वचिदिति। स्वतः सिद्धव्यभिचारसंदेहाभा
वस्थलइत्यर्थः।उपाधिसंदेहादिति।साधनेउपाधिसंदेहादित्यर्थः।व्यापकसंशयंप्रतिव्याप्यसंशयस्यहेतुत्वमित्यभिप्रायेणोक्तमितिध्येयं।क्वचिदिति।उपाधिसंदेहाभावस्थलइत्यर्थः।विशे
षदर्शनेसति।व्यभिचाराभावव्याप्यवत्तानिर्णयाभावतर्काभावादिसहकृतव्यभिचारतद्भावसहचरितधर्मविशिष्टपक्षज्ञानजन्यकोटिद्वयोपस्थितिविशादित्यर्थः॥ ॥छ॥